९४२-घ

No. ९४२-घ

Title वाक्यवृत्तिप्रकाशिकाटीका

Author विश्वेश्वरपण्डित:

Extent २२ Age

Subject वेदान्तशास्त्रम् . सम्पूर्णम्

नं० ६४२-घ

शाक्तवृत्तिप्रकाशिका (वेदान्तशास्त्रम्)

पत्राणि २२ (सम्पूर्णम्)

नं० ५४२-घ

लिपिकः विश्वेश्वर पंडितः

नं० ६४२-घ

वाक्यवृत्तिप्रकाशिका (वेदान्तशास्त्रम)
वाक्यवृत्तिटीका
पत्राणि २२ (सम्पूर्णम)
लिपिक: विश्वेश्वर पण्डित:

ॐ श्रीगणेशाय नमः। अज्ञानतिमिरांधस्य ज्ञानांजनशलाकया चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः। (ब्रह्माहमेतन्मयि
भाति विश्वं श्रीमाधवप्राज्ञगुरोः प्रसादात् अन्वर्थविश्वेश्वरपंडिताख्यस्तस्यांघ्रिपद्मं प्रणतोस्मि नित्यं २ परमकृपानि
धयः श्रीमच्छंकरभगवत्पादाः तापत्रयार्कसंतप्तानामपरिमितजन्मादिसंसाराध्वश्रमपीडितानां आत्मज्ञानशिशिर
मधुरजलाकांक्षिणं विदूरशारीरकमीमांसाजलाशयगमनासमर्थानां वाक्यवृत्तिसंज्ञिकोपदेशप्रकरणप्रपापरि
कल्पनेन अंतःशीतलतां विगतक्लेशतां च आपादयन् तत्रादौ प्रकरणश्रवणे प्रवृत्तानां अधिकारिणामविघ्नेन बुध्य
प्रतिपत्तिं प्रकरणप्रतिपाद्याद्वितीयबोधस्मरणपूर्वकं नमस्कारस्यावश्यकर्त्तव्यतां द्योतयन् स्वयं नमस्कुरुते सर्ग
स्थितिप्रलयहेतुमचिंत्यशक्तिं विश्वेश्वरं विदितविश्वमनंतमूर्त्तिं निर्मुक्तबंधनमपारसुखांबुराशिं श्रीवल्लभं विमल
बोधघनं नमामि १ टीका। विमलबोधघनं नमामीत्यन्वयः विगतो मलो यस्मादसौ विमलः विमलश्चासौ बोधश्च विमलबोधः
स एव घनमूर्त्तिः स्वरूपमिति यावत् परमात्मनो अविद्यारहितत्वात् तदविद्यापरिकल्पितस्य घटादिदृश्यस्याभावेन तदा
लंबनरूपो मलो न विद्यते अतो विमलः निर्विषयः निर्विकल्पः अद्वितीयज्ञानमिति यावत् अद्वितीयबोधस्य मनसोप्य
विषयत्वात् कथं नमस्कारविषयतेत्यत आह विश्वेश्वरमिति अद्वितीयबोधस्यैव विश्वस्वामित्वेन अवस्थानात् नमस्का
रविषयत्वं उपपद्यत एवेत्यर्थः एवं चेत् अद्वितीयबोधस्य विश्वस्वामित्वसंपादनाय शरीरस्वीकरणमेव नोपपद्यते इत्य
तआह अचिंत्यशक्तिमिति शक्तिशब्देन अत्र मायाभिधीयते सा च बोधात्मनो ब्रह्मणो भिन्नाभिन्नत्वादिरूपेण चिंतितुं ना
र्हतीत्यचिंत्यत्वं मायायाः कथमिति चेत् उच्यते रज्जुस्वप्नबोधबाध्यत्वात् स्वप्नसदृशी भवति युक्तिहीनप्रकाशत्वात् अस्याः
मायेति संज्ञा इयमसती न भवति दृश्यमानत्वात् न हि शशविषाणादिकमसत् दृश्यते सती च न भवति बाध्यमानत्वात्
न हि सन्नात्मा कदाचिद्बाध्यते आत्मनो न हि भिन्ना भवति अधिष्ठानसत्ताव्यतिरेकेण तस्याः पृथक्सत्ताया अभावात् न
हि रज्ज्वारोपितस्य सर्पस्य तद्भिन्नत्वं रज्ज्वाद्यभावे तददर्शनात् न तदभिन्ना च भवति जडत्वात् न हि जडाजडयोरैक्य

वा. र.
१
रूपत्वं वस्तुनो द्वैरूप्यासंभवात् न चोभयात्मिका विरुद्धत्वात् नैवं सावयवा अनादित्वेन स्वकारणावयवाभावात् न ह्येका-
रणकं असावयवं भवति नापि निरवयवा स्वकार्येषु सावयवत्वदर्शनात् न ह्यंकुरादिकारणं निरवयवं भवति तस्मा-
दविचारितरमणीयापातलालित्येनानुत्सा असत्प्रभूतेषु स्वकार्येषु विभ्रमैर्जीवं मोहयत्येव अतो मायायाः अचिंत्यत्वं इदं तु तस्याः
दूषणं न भवति किं तु भूषणमेव एवंभूताचिंत्यशक्तिवशात् विमलबोधस्य शरीरस्वीकारे उपपद्यत इति भावः अ-
द्वितीयबोधस्य अचिंत्यशक्तिवशात् शरीरस्वीकारणे किं प्रयोजनमित्याकांक्षायां सार्वभौमस्येव विभिन्नस्वात्मत्वेन लीला-
प्रयोजनं स्वरूचितमपि लक्ष्मीकांतत्वेन क्रीडाप्रयोजनं ज्ञापयन् तस्य विष्णुरूपेण अवस्थानमाह श्रीवल्लभमिति लोके
ग्रंतं ४६ सकलसुंदरीजनस्य दृष्टांतैः सौंदर्यवत्याः इंदिरायाः प्रसादादेव सुकृतीनां योगिनां आकाशगमनं परकायप्रवेशनं बहुरूप-
स्वीकारादि क्रीडासंभवः शरीरस्वीकारादि क्रीडासंभवतीत्यत्र किं वक्तव्यमिति तथा च सति तस्याः भर्तुः बहुसंभवश-
रीरस्वीकरणे क्रीडैव प्रयोजनमिति श्रीवल्लभशब्देन अवगम्यते विमलबोधस्य श्रीवल्लभरूपेण अवस्थानादपि
नमस्कारविषयत्वमुपपद्यत एवेत्यर्थो लभ्यते ननु विश्वसद्भावे विश्वस्यापि लं क्रीडा च अतो विश्वं कुत उत्पन्नमित्या-
कांक्षायां विमलबोधादेव विश्वोत्पत्तिरिति वक्तुं कारणब्रह्मरूपेणावस्थानमाह विदितविश्वमिति विदितं विश्वं स-
र्वं येन स तथोक्तः सर्वविदित्यर्थः सर्वविदो जगन्निमित्तकारणत्वं श्रुतिः यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः तस्मा- श्रष=
देतद् ब्रह्म नामरूपमन्नं च जायत इति अनुमानमपि इदं विश्वं विशिष्टविज्ञानवत्कर्तृकं विचित्रकार्यत्वात् चित्रादि-
वत् इति यद्वा विमलबोध एव अचिंत्यशक्तिवशात् स्वयंभूर्भूत्वा विविधाकाराकारितमायासाक्षीभवेत् तदा विश्वमुत्पन्नं
स्यादिति वेदितव्यं ननु उपादानव्यतिरेकेण केवलनिमित्तं कार्योत्पादकं न भवति अत्र किमुपादानमित्यपेक्षायां विम-
लबोधस्यैव अचिंत्यशक्तिवशात् विश्वोपादानत्वमाह सर्गस्थितीति यथा लोके कुंडलादिकार्यस्य सुवर्णाद्युपादानादु-
त्पत्तिः तत्रैव स्थितिः तत्रैव प्रलयश्च दृश्यते तथा जन्माद्यस्य यत इति सूत्रे यतो वा इमानि भूतानि जायंते इति तद्विषय- १

वाक्येन ब्रह्मण एव सर्वेषां नानामुक्तिरित्यत्रैव स्थितिः तत्रैव ब्रह्मपक्ष उपपत्तेः अतो विमलबोधस्यैव विद्योपादानत्वं सिद्धमिति
अपरमर्थो ऽवगम्यते अत्र यथा ऊर्णनाभिर्जंतुविशेषः तंतूत्पादने स्वयं निमित्तमुपादानं च भवति तथा विमलबोधस्येति कृ
त्वा एकस्यैव निमित्तत्वमुपादानत्वं च कोपपद्यत इति शंका न करणीया यतो विद्योपादानं विमलबोधः ततः तस्य तत्कार्यविश्व
रूपेणावस्थानमाह अनंतमूर्त्तिमिति अनंता मूर्त्तयो देहाः यस्य स तथोक्तः विमलबोधस्य प्राणिरूपेणावस्थाने बंधप्रसक्तौ
तां परिहरन्नाह निर्मुक्तबंधनमिति ममैवांशो जीवलोके जीवभूतः सनातन इति स्मृतेः आत्मांशस्य मायामूलस्य जीवस्यै
व अविद्या तावद्बंधो भवति न तु मायिकस्य अद्वितीयस्य विमलबोधस्याविद्यारहितस्य स्वीयमायया प्राणिरूपेणावस्थितस्य
बंधोस्तीत्यर्थः एवं विमलबोधोऽचिंत्यशक्तिवशात् विश्वस्य साध्यनेकरूपेण क्रीडमानोऽपि निर्मुक्तबंधश्चेत् तर्हि तस्यैवाने
करूपावस्थानमेव वरं तत्तत्सुखसद्भावात् न तु केवलस्वरूपेणावस्थानमित्याशंक्य तत्तत्सुखसद्भावस्य खंडितत्वात्
न तथेत्याह अपारसुखांबुराशिमिति अंबुराशिमिव अंबुराशिः सुखमेवांबुराशिः सुखांबुराशिः अपारश्चासौ
सुखांबुराशिश्चेति स तथोक्तः आनंदाद्ध्येव खल्विमानि भूतानि जायंते इत्यादिश्रुतिभ्यः आत्मनः आनंदरूपावगमात् विम
लबोधस्य अपरिमितानंदरूपेणावस्थानमेव वरं तथाप्यनिर्वचनीयमायाशक्तिवशात् स्वेच्छयैव अनेकरूपावस्थानल
क्षणक्रीडासंभवस्यैव १ एवं सर्ववेदांतैर्नैयत्येन उपास्यत्वेन च निर्दिष्टं गुरूपदिष्टं सोपाधिकं निरुपाधिकं ब्रह्मस्वरूपम
भिधाय नमस्कृत्य प्रतिपत्तिसिद्धये स्वगुरून्नमस्कारं कुरुते यस्य प्रसादादहमेव विष्णुर्मय्येव सर्वं परिकल्पितं च इत्थं
विजानामि सदात्मरूपं तस्यांघ्रिपद्मं प्रणतोस्मि नित्यं २ टीका यस्य प्रसादादिति आचार्यप्रसादादविद्यानिवृत्तौ तद
विद्यापरिकल्पितदेहेंद्रियाद्युपाध्यवच्छेदानवगमात् उपाधिविनिर्मुक्तघटाकाशवत् परिपूर्णतां प्रतिपद्य स्वस्यैव
विष्णुत्वं विदित्याह अहमेवेति तर्हि विश्वस्याधिष्ठानत्वं तवास्ति किमस्त्येवेत्याह मय्येवेति ननु जीवस्य विष्णुत्वं
अनुपपन्नं प्रत्यक्षविरोधात् अतो भावनामात्रं तदित्याशंक्य न हि जीवो नाम कश्चित् परमार्थतो ब्रह्मव्यतिरेकेणास्ति
अतो ब्रह्मैव स्वकल्पितमायया जीवरूपेण विवर्त्तते तथा च सति तस्य जीवस्य वेदांतवाक्यश्रवणादिना ब्रह्मा

वा·व·
२ परोक्षज्ञाने सत्य ज्ञाननिवृत्त्या तत्कार्यस्य निवृत्तौ ब्रह्मत्वनिवृत्तौ सत्यां ब्रह्मत्वमुपपन्नं स्यादितीममर्थं मनसि निधायाह
स्वयं विजानामीति आत्मस्वरूपमित्यर्थः अहं ब्रह्मेत्यपरोक्षतया जानामीत्यर्थः न च ब्रह्मणो वाङ्मनसागोचरत्वात् कथं
2 ज्ञानविषयत्वमिति वाच्यं फलव्याप्यत्वेन विषयत्वाभावेऽपि ज्ञाननाशाय वृत्तिव्याप्यत्वेपि तत्त्वेन अखंडाकारांतःक
रणवृत्तिविषयत्वात् न च जीवस्य ब्रह्मत्वे प्रत्यक्षविरोधः अज्ञानेनावृतं ज्ञानं प्रकाशयति तत्परमित्यंतेन भगवद्गी
तायां अज्ञानेनावृतात्मस्वरूपानंदादिरूपस्य अत एव जीवत्व दुःखित्वादि युक्तस्य ब्रह्मत्वानुपपत्तिः स्यात् यस्य पुनः ज्ञा
नेनाज्ञानं निवृत्तं भवति तस्यात्मस्वरूपानंदादि ब्रह्मस्वरूप प्रकाशसद्भावेन ब्रह्मत्वोपपत्तिः स्यादिति कर्मभेदेन ब्रह्मत्वा
दितण् नुपपत्त्युपपत्त्योः प्रतिपादितत्वात् न त्वेकस्य ब्रह्मत्वानुपपत्त्या अन्यस्यापि तदनुपपत्त्या भवितव्यमिति नियमोऽस्ति तथा चो
क्तं वासिष्ठे अज्ञस्य दुःखौघमयं ज्ञस्यानंदमयं जगत् अंधं भुवनमंधस्य प्रकाशं तु सचक्षुष इति अस्यार्थः यथा एक
मेव जगत् अंधापेक्षया तमोरूपेणावभासते अनंधापेक्षया प्रकाशरूपेणावभासते एवं अज्ञस्य दुःखराशिरूपे
ण जगद्भासते ज्ञस्य तु तदेव जगत् सच्चिदानंदाव्यतिरेकेणानंदमयं प्रकाशत इति अतः अज्ञदृष्ट्या ब्रह्मत्वमनु
पपन्नमपि तत्त्ववित् दृष्ट्या ब्रह्मत्वमुपपन्नमिति भावः तद्विज्ञानस्य कदाचित्कत्व शंकां परिहरति सदेति मायिक
देहपातपर्यंतं स्वरूपमनुभवामीत्यर्थः अथवा देहेंद्रियादि परिच्छिन्नत्वाभिमानयुक्तस्य जीवस्य अपरिच्छिन्नब्रह्मा
प कारत्वमनुपपन्नं स च अभिमानो ब्रह्मापरोक्षज्ञानदार्ढ्यादेव निवर्तते तच्च ज्ञानदार्ढ्यं आवृत्तिरसकृदुपदेशादिति
चिकरणन्यायेन चिरकालकृतवेदांतश्रवणमनननिदिध्यासादेव भवति अतो देहादिपरिच्छिन्नत्वाभिमाननिवर्त
कब्रह्मापरोक्षज्ञानदार्ढ्याय सर्वदा आत्मस्वरूपमित्यनुभवामीत्याह स्वयं विजानामि सदात्मरूपमिति सदा या
वत् ज्ञानदार्ढ्यं इत्यमहं ब्रह्मैवेति आत्मस्वरूपं स्वस्वरूपं विजानामि अपरोक्षतयानुभवामि एतेन यस्य कस्यचि
त् अपरोक्षज्ञाने जातेपि अपरिच्छिन्नत्व विषयासंभावना विपरीतभावना निरासकतया ज्ञानदार्ढ्याय शमादि २

युक्तः सन् विजातीयप्रत्ययनिराकरणपुरःसरं अहं ब्रह्मैवेति सर्वदा आत्मचिंतां कुर्यादित्युक्तं भवति अहमेव विष्णुः मय्ये
व सर्वं परिकल्पितमित्यनेन अपरोक्षज्ञानसद्भावः सूचितः इत्थं विजानामि सदात्मरूपमित्यनेन असंभावनाविव
हैकापरोक्षज्ञानदार्ढ्यं चास्तीति सूचितं अतोऽस्य श्लोकस्यायमर्थः यस्य गुरोः प्रसादादपरोक्षज्ञानेन निःशेषदे
हादिपरिच्छिन्नत्वाभिमाननिवर्तकज्ञानदार्ढ्यं च निरंतरानुभवेन सिद्धं तस्यांघ्रिपद्मं प्रणतोऽस्मि नित्यमिति स्वस्य
विमलत्वकथनं स्वकीयग्रंथस्य अनायासेन ब्रह्मापरोक्षज्ञानजनकत्वप्रदर्शनार्थं गुरूत्कर्षवर्णनार्थं च न स्तुत्यर्थं दे
हमतिरिक्तात्मनिष्ठस्य देहाभिमानासंभवात् देहनिबंधनस्तुत्यापेक्षानुपपत्तेः २ आचार्यवान्पुरुषो वेदेत्या
दिश्रुतिभ्यः आचार्याच्छिष्यस्य विद्यालाभदर्शनात् शिष्याचार्यप्रश्नोत्तररूपेणैव तत्त्वं निरूपयितुं प्रथमं ताव
च्छिष्यस्य लक्षणमाह तापत्रयार्कसंतप्तः कश्चिदुद्विग्नमानसः शमादिसाधनैर्युक्तः सद्गुरुं परिपृच्छति ३ टीका
तापत्रयशब्देनाध्यात्मिकाधिभौतिकाधिदैविकास्तापा उच्यंते आत्मानं देहमधिकृत्य प्रवर्तत इत्यध्यात्मं अ
ध्यात्मशब्देन श्रोत्रादिज्ञानेंद्रियपंचकं वागादिकर्मेंद्रियपंचकं प्राणादिवायुपंचकं मन आद्यंतःकरणचतु
ष्टयं चोच्यते तत्संबंधी तापः आध्यात्मिकः आध्यादि अथ भूतानि पृथिव्यादीन्यधिकृत्य भवतीत्यधिभूतं अधि
भूतशब्देन इंद्रियगोचरा उच्यंते प्राणिहिंसकाः चोरव्याघ्रनक्रादयो अभिप्रेताः तत्संबंधितापः उपप्लवः
आधिभौतिकः अधिदैवशब्देन दिग्वातार्कप्रचेतोऽश्विवह्नींद्रोपेंद्रमृत्युकाः चंद्रो विष्णुश्चतुर्वक्त्रः शंभुश्च
करणाधिपा इति निर्दिष्टाः इंद्रियाधिदेवता उच्यंते तत्संबंधितापः उपप्लवः आधिदैविकः अतिशीतोष्ण
वातवर्षादिः अस्य त्रयतापहेतुभूतस्यात्मधर्षणादर्कवदसह्यत्वात् तापत्रयमेवार्कः तेन संतप्त उद्विग्न
मानसः इति व्याकुलितमनाः इहामुत्रार्थफलभोगाद्विरक्त इत्यर्थः ननु विषयजनितसुखस्य सर्वैः प्रार्थ्यमा

प्रत्यंतरं

वा॰बो॰ नत्वात् कथं तत्त्यागोऽघटत इति चेन्न कर्मसाध्यस्य कृष्यादेरिवानित्यत्वेन विषयसुखानामपि साधनपारतंत्र्यादपि
२ स्पुत्वस्पर्शनात् अल्पसुखाय तथा बहुतरदुःखसंभवाच्च विषयसुखाभासेभ्यो मुक्तिमंतरं विरक्तिरेव स्यात् न च भिक्षु
3 भियापाचनाकरणाभाववत् मृगभियाशाल्यादिकृष्याद्यनारंभाकरणवत् मत्स्यग्राहकेण कंटकादिसहित
मत्स्यादिकं गृहीत्वा हेयांशत्यागेन उपादेयांशग्रहणवत् विषयसुखस्य दुःखरूपत्वेपि दुःखांशपरिहारेण सु
खग्रहणं युक्तमिति वाच्यं विषमिश्रमध्वादिवत् दुःखपरिहारेण सुखग्रहणासंभवात् त्याग एव युक्तः तथैव च वि
षयसुखस्य अनित्यत्वेन दुःखमिश्रत्वे न च त्याज्यत्वेपि अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति अपाम सोम
ममृता अभूम इत्यादिश्रुत्या स्वर्गादिभोगस्यानित्यत्वाभावात् दुःखमिश्रत्वाभावाच्च तत्त्यागः कथमिति चेन्न तद्यथे तस्मात्
हकर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयत इत्यादियुक्त्यनुगृहीतश्रुत्या स्वर्गादिभोगस्या
प्यनित्यत्वप्रतिपादनात् तत्रापि मुत्वानित्यत्वसातिशयत्वजनितदुःखस्यानिवार्यत्वात् त्यागोऽपि युक्त एव
नित्यत्वप्रतिपादकायाः श्रुतेः का गतिरिति चेत् आभूतसंप्लवं स्थानममृतत्वं हि भाष्यत इत्याद्यापेक्षिकनित्यत्वप्र
तिपादनपरत्वात् तस्मादुभयविधसुखाद्विराग एव श्रेयान् " शमादिसाधनैर्युक्त इति शमादिशब्देन शमदम
क्षांत्यार्जवसमचित्तत्वादयो अभिप्रेताः शमोंतःकरणोपरमः दमो बाह्यकरणस्य आत्मज्ञानविरोधिभ्यो हि
र्व्यापारे परमः क्षांतिः परापराधेष्वविक्रिया आर्जवमृजुभावः कायवाङ्मनसामेकरूपता समचित्तत्वं प्रियाप्रि
यप्राप्तिषु हर्षविषादराहित्यं सद्गुरूपसर्प्य पृच्छतीति सद्गुरुः सम्यग्दर्शनसंपन्नो वेदांतशास्त्रपरिज्ञाननिर्मोहका
मः सन् महावाक्यतो विशेषतः स्वरूपजिज्ञासया परिपृच्छति पृच्छतिपदं प्रणिपातसेवयोरप्युपलक्षणं तद्विद्धि प्र २

त्रिपातेनेति भगवद्वचनेन गुरुशिष्यलक्षणयोर्दर्शितत्वात् ननु मोक्षसिद्ध्यर्थं आत्मविचाराय गुरूपसत्त्य
प्रवृत्तः शिष्यः प्रवर्ततामित्युक्तं तदनुपपन्नं अप्रतीते निष्फले वा न्यायेन प्रवर्तते किंतु विप्रतिपन्ने अत्र आत्म
नि विप्रतिपत्तिर्नास्त्येव अहं कर्ता अहं भोक्ता अहं गच्छामि तिष्ठामीति कर्तृत्वभोक्तृत्वाद्याकारेणानवर
तमनुभूयमानत्वात् प्रयोजनाभावादपि न विचारमर्हति न च तत्ज्ञानात्संसारनिवृत्तिः प्रयोजनमिति क
त्तै र्तृत्वादिरूपात्मज्ञानेन सह संसारावस्थानस्य दृष्टत्वेनोभयोर्विरोधाभावात् न च अनध्यस्तात्मविज्ञानात् सौ
तत्र अध्यस्तस्य संसारस्य निवृत्तिः स्यादिति वाच्यं अध्यासस्य दुर्निरूपत्वेन तदसंभवात् नहि कज्जलमुक्
रयोरिव जडाजडयोरत्यंतविलक्षणयोरात्मानात्मनोः परस्परतादात्म्यं संभवति तस्मादध्यासानिरूपणादा
त्मनि संदेहाभावात्संसारनिवृत्तिरूपप्रयोजनाभावाच्च आत्मविचाराय गुरूपसदनं न कर्तव्यमिति चेत्सत्यं व
स्तुतस्तु आत्मानात्मनोः परस्परतादात्म्याभावेऽपि अत्यंतविलक्षणयोर्दुर्घटकारिण्या विचित्रशक्त्या आवृत
त्वेन विवेकाभावे सति अन्यस्मिन् अन्यारोपं कृत्वा अहं मनुष्यो ब्राह्मणः क्षत्रियो ममायं पुत्रः वसुरि
त्याद्यनादिर्मिथ्याव्यवहारः संभवति इदमेव प्रपंचस्याध्यस्तत्वं नाम यदतस्मिन् अन्यबुद्धिता अ
ध्यासो नाम अतस्मिंस्तद्बुद्धिरित्यवोचामेति भाष्यकारैरुक्तत्वात् अध्यासस्य कारणभूताया मायायाः अनिर्व
चनीयत्वेन तत्कार्यभूताहंकाराद्यध्यासस्याप्यनिर्वचनीयत्वं विस्तरभयात् ख्यात्यंतरचतुष्टयमत्रानुक्त
निरस्तमिति द्रष्टव्यं सर्वेषां मतेऽपि अन्यस्य अन्यधर्मावभासता न व्यभिचरति न चान्यत्र सतः सर्पादेरन्यत्रा
रोपो दृष्टः अत्र त्वात्मव्यतिरिक्तस्य सर्वस्य असत्त्वेन अन्यत्र सत्त्वाभावात् कथमध्यास इति वाच्यं पूर्वदृष्टस्य स
त्त्वाभावेऽपि वादेः भ्रमानुदयादर्शनात् स्मृतिरूपः परत्र पूर्वदृष्टावभास इत्यध्यासलक्षणे पूर्वदृष्टत्व
मात्रस्यैवाध्यासोपयोगित्वेनांगीकारात् तस्मात् पूर्वभ्रमजनितसंस्कारस्याप्युत्तरभ्रमजनकत्वं ।

वा॰वृ॰ स्यात् पूर्वभ्रमस्यापि ततः पूर्वभ्रमसंस्काराज्जनि इत्येवं परंपरयाऽनाद्यनिर्वाच्याहंकाराद्यध्यासः सं
५ भवत्येव, नापि कस्यांचिच्छ्रुत्या स्पष्टं निरूपितत्वमहंकाराद्येव किंतु सत्यं ज्ञानमनंतं ब्रह्म आनंदो ब्रह्मेति एको देवः
सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मा कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च
निष्कलो निरंजनो निर्विकल्पो निराख्यातः असंगो ह्ययं पुरुष इत्यादि श्रुतयः कर्तृत्वभोक्तृत्वादिवर्जितं
अद्वितीयं जातिगुणक्रियाषडूर्मिषड्भावादिदोषानुसंगरहितं सत्यज्ञानानंदस्वरूपं सर्वव्यापिनं सर्व
साक्षिणं आत्मानं लक्षयंति अतस्तादृक्भूतात्मनः संदिग्धत्वात् ब्रह्म वेद ब्रह्मैव भवति तरति शोकमात्म
वित् भिद्यते हृदयग्रंथिरित्याद्यनेकश्रुतेः तदपरोक्षज्ञानात् तदविद्यापरिकल्पितस्य मिथ्याभूतस्य सं
सारस्य निवृत्तिसंभवात् साधनचतुष्टयसंपन्नानंतरं वेदांतमहावाक्यतः स्वात्मविचाराय गुरुमुपसृत्य
तं परिपृच्छतीत्युक्तं तदुपपन्नमेव संसारिणां विषयलुब्धानां विषयार्जनरक्षणनाशभूतापत्रयं संभवति
तेन तेन तापेन संतप्तानां तेषां मध्ये कश्चिदेतज्जन्मनि जन्मांतरे वा काम्यनिषिद्धवर्जनपुरःसरं ईश्वरा
र्पणबुद्ध्यानुष्ठितनित्यनैमित्तिकप्रायश्चित्तसगुणोपासनादिभिः प्रक्षालितांतःकरणो विषयाणां सु
खापेक्षतरदुःखहेतुत्वदर्शनात् अनित्यत्वाच्चोद्विग्नमानसो भवति ततः शमादिसाधनैर्युक्तः सन्नेवं
प॰ धनैरस्यर्थमात्मविचाराय गुरुं परिपृच्छतीति भावः तत्रयो हेतु शमादीनां पूर्वपूर्वस्योत्तरोत्तरं प्रति
हेतुमद्भावो द्रष्टव्यः तापत्रयार्कसंतप्तः कश्चिदुद्विग्नमानस इत्यनेन विरक्तिहेतुप्रतिपादकाद्यशब्दा
र्थो निर्णीतः शमादिसाधनैर्युक्त इत्यनेनानंतर्यार्थ अतःशब्दार्थो निर्णीतः सद्गुरुं स्वस्वरूपविचाराय परिपृच्छ
तीत्यनेन ब्रह्मज्ञानाय वेदांतवाक्यार्थविचारकर्तव्यता दर्शिता ततः ब्रह्मजिज्ञासाशब्दार्थो निर्णीतः एवम ८

नेनश्लोकेनाथातो ब्रह्मजिज्ञासेति प्राथमिकाधिकरणन्यायो निरूपित इति द्रष्टव्यः ३ गुरुं परिपृच्छतीत्युक्तं किं परिपृच्छ
तीत्याकांक्षायां बंधनिवृत्तिसाधनं परिपृच्छतीत्याह अनायासेन येनास्मान्मुच्येयं भवबंधनात् तन्मे संक्षिप्य भगव
न्केवलं कृपया वद ४ टीका न विद्यते आयासो यस्मिन्न् तत्तथोक्तं येन मुक्तिसाधनेन अस्मादिति पदेन भवबंधनस्य
प्रत्यक्षसिद्धं दुःखरूपत्वमुच्यते भवबंधनात् भवः संसारः स एव बंधनमिव बंधनं तस्मान्मुच्येयं मुक्तः स्यात्तन्मु
२५ क्तिसाधनं संक्षिप्याविस्तार्य इदमिति वदेत्यर्थः येन संसारान्मुक्तः स्यात्तद्वदेत्युक्तं तत्र वक्तव्यं किं शुद्धात्मनः संसा
रः आहोस्विद्देहेंद्रियादिपुंजाहंकारस्य नाद्यः आत्मनो निर्विकारत्वेन व्यापारशून्यत्वात् न द्वितीयः लिंगशरीराहंका
रस्य कुड्यादिवज्जडत्वेन प्रवृत्त्यसंभवात् तर्हि न कस्यापि संसार इति न च वाच्यं प्रतीत्यपलापासंभवात् तस्मा
त्प्रतीयमानः संसारः किंनिष्ठ इति चेत् उच्यते वस्तुतस्त्वहंकारात्मनोरुक्तरीत्या संसारासंभवेपि निर्विकाराय
स्कांतसन्निधिवशादचेतनलोहप्रवृत्तिवत् केवलचैतन्यसान्निध्यादेव देहेंद्रियादिपुंजाहंकारस्य चिदाभासानु
प्रवेशवशात्स्वतंत्रः संसारः संभवति स च साभासाहंकारगतसंसारो मिथ्याज्ञानेनात्माहंकारयोर्भेदस्यावि
त्वेन तदविवेकात्साक्षिचैतन्येऽध्यारोप्यते यावत्स्वस्वरूपसाक्षात्कारादज्ञाननिवृत्तिः स्यात्तदावरणापायो न स्यात्
तावन्मिथ्याभूतोपि संसारोऽज्ञानिनां सत्य इव भातः सन् पुत्रभार्यादिषु नष्टेषु पुष्टेषु अहमेव नष्टः पुष्ट इति स्व
स्मिन्नारोप्य धर्माध्यासद्वारा सुखदुःखशोकमोहादिकं प्रयच्छत्येव यथा मिथ्याभूतोपि रज्ज्वामारोपितः सर्पो याव
न पाकृतं जनभयकंपादिहेतुर्भवति एवं मिथ्या संसारस्याप्यनर्थकारित्वात् तन्निवृत्तिसाधनमन्वेषणीयमेवा
तः संसारस्यैवाभावात् येन संसारान्मुक्तः स्यात्तद्वदेति प्रश्नोऽनुपपन्न इति शंका प्रत्युक्ता एतत्सर्वं देहेंद्रियादेर्या
भावादित्यादि श्लोकत्रयेणाचार्यस्तु तत्र व्यक्तीकरिष्यति बोधाभासो बुद्धिगतः कर्ता स्यात्पुण्यपापयोः स एव

वी॰ व॰ संसारे कर्मवशात् लोकद्वये सदा सावहिताएः पुरतो भाति लिंगं देहेन संयुतं चितिच्छायासमावेशात् जीवः स्याद्व्यावहारि
५ कः अस्य जीवत्वमारोपात् साक्षि एव व्यवभासते व्याप्ते लिंगे द्रियभेदाव्यापारी या विविकिनां इत्यपतेत्रे बुधास्तु
5 धावन्ति वयथा शशी आलस्ये चैतन्यमाश्रित्य देहेन्द्रियमनोधियः स्वकीयार्थेषु वर्तन्ते सूर्यालोकं यथा जनाः स्वदेहे हमि
नेदं स्यंपते दुःखदो वस्त्वत्रेयः अतस्तस्यैव संसारो नैव संसृतिः साक्षिएः इत्यादि एवं चार्थः प्रति
पादित वह्व्ग्रंथस्यास्मिन् अर्थे प्रमाएं अतः कल्पित संसार निवृत्यर्थं साधनप्रश्न उपपन्न एवेति सिद्धं
अनेनापि जिज्ञासा हेतु समाधानं द्रष्टव्यं मुक्तिसाधनस्यानात्पसविशेष
लेन यज्ञदानेतप आदिज्ञानोत्पत्ति साधनं समस्तं निरस्तं स्यात् सर्वापेक्षा च यज्ञादि श्रुतेरश्ववदिति अधिकर
एन्यायेन यज्ञादीनां अतः करएशुद्धिद्वारा विविदिषोत्पादकत्वमंतरेए साक्षान्मुक्तिहेतुत्वासंभवात् ज्ञानं तु ज्ञानवि गु८
रोधित्वेन स्वतो मुक्तिसाधनमितिभावः भगवच्छंकर प्रयोगेए वेदांतकृद्वेदविदेव चाहमिति वेदांतार्थ संप्रदायकृद्वेदे
दार्थविच्च पुरुषोहमेवेतिभगवतो वक्तृत्वात् आचार्यस्य भगवत्वं तात्विकमेवेति विदित्वा आचार्यमुद्दिश्य हे भगवन्
हे स्वामिन् हे महादेवेति परमेश्वर वाचकानि वचनानि शिष्येए वक्तव्यानीति ज्ञापयति केवलं कृपया वदेत्यनेन तत्स्यगुरोः प८ह
स्वरूपनिष्ठतया निरपेक्षत्वेन दृष्टप्रयोजनापेक्षाभावादुपदेशकारएं कृपैवेति मत्वा शिष्येए चार्यकृपोत्पादका
नि वचनानि वक्तव्यानीति ज्ञापयते ५ तुच्छसुखत्व साधनप्रश्नानपेक्षत्वतया संसारतापतप्तानां मुमुक्षूएं सर्वेषां
स्मानंदप्राप्तिसाधनस्य वक्तव्यात्तं प्रश्नमभिनंदति साध्वीते वचनव्यक्तिः प्रतिभाति वदामि ते इदं तदिति विस्पष्टं
सावधानमनाः शृएु ५ टीका विस्पष्टं वदामीत्यनेन स्पष्टत्वादिकं आचार्य धर्म इत्युक्तं सावधानमनाः शृएवित्य
नेन एकाग्रचित्तत्वं शिष्य धर्म इति सूचितं इदं तदिति इदमेव मुक्तिसाधनमिति ५ किमिति बुभुक्षामिमुखत्व भूतायशि ५

पदछेदः पदार्थोक्तिः विग्रहो वाक्ययोजना आक्षेपस्य समाधानं व्याख्यानं पंचलक्षणं ॥

व्याख्यायते देवाह तत्त्वमस्यादिवाक्योत्थं यज्जीवपरमात्मनोः तादात्म्यविषयं ज्ञानं तदिदं मुक्तिसाधनं ॥ टीका त
त्वमस्यादिवाक्योत्थं वाक्यश्रवणजन्यं जीवब्रह्मतादात्म्यविषयं उभयोरपि स एवात्मा तदात्मा जीवस्य य आत्मा
स्वरूपं स एव परमात्मनः परमात्मनो य आत्मा स्वरूपं स एव जीवस्येति तदात्मा तस्य भावस्तादात्म्यं एकत्व ।
मित्यर्थः तदेव विषयं यस्य ज्ञानस्य तत् तथोक्तं तत्त्वमस्यादिवाक्येन जीवब्रह्मतादात्म्ये प्रतिपादिते सति तत्प्र
तिपादकवाक्यश्रवणजन्यजीवब्रह्मतादात्म्यविषयं यज्ज्ञानमस्ति तदिदं मुक्तिसाधनमिति तस्यैव वाक्यज
न्यज्ञानस्यैतत्प्रकरणजन्यत्वमुक्तं तत्त्वमस्यादिवाक्यस्यैव व्याख्यानत्वादस्य ग्रंथस्य तयोरैकार्थ्यं चोपप
त्तेः पूर्वं मुमुक्षोर्यं भवबंधनादित्यनेन भवबंधनिवृत्तिकामोधिकारी सूचितः इदानीं प्रकरणस्य जीवपरमात्म
तादात्म्यविषयः तत्तादात्म्यप्रकरणयोः प्रतिपाद्यप्रतिपादकभावः संबंधः मुक्तिः प्रयोजनमिति सूचिते
ऽतो विषयप्रयोजनसंबंधाधिकारिसद्भावात् प्रकरणानारंभशंकापास्ता ॥ एवं शिष्येण पृष्टमाया
सरहितं मुक्तिसाधनं जीवपरमात्मनोः तादात्म्यविषयं ज्ञानमित्युक्तं इदानीं तत्रानुपपत्तिं शिष्यः चोदयति को जी
वः कः परश्चात्मा तादात्म्यं वा कथं तयोः तत्त्वमस्यादिवाक्यं वा कथं तत्प्रतिपादयेत् ७ टीका जीवपरमात्मा
नं च न जानामि अज्ञातयोस्तयोस्तादात्म्यं वा कथं ज्ञायते परस्परविलक्षणयोर्जीवेश्वरयोः कथमेकं घ
टते तत्त्वमस्यादिवाक्यं वा तदज्ञातपदार्थयोः तादात्म्यं कथं प्रतिपादयेदित्यर्थः ७ एतानाक्षेपान् क्रमे को
ण समाधातुं आचार्य आह अत्र ब्रूमः समाधानं कोन्यो जीवस्त्वमेव हि यत्त्वं पृच्छसि मां कोहं ब्रह्मैवासि न संश
यः टीका अत्र येष्वाक्षेपेषु प्राथमिकस्योत्तरत्वेन चेतनस्य जीवत्वमित्याह अन्यो जीवः क इति चेतनादन्यो जी
वो नास्तीत्यर्थः ननु तथापि चेतनस्य ज्ञेयत्वाभावादज्ञातत्वं तथैवावतिष्ठत इत्यत आह त्वमेवेति चेतनस्य
ज्ञेयत्वाभावेपि स्वव्यतिरिक्तांतःकरणादिसाक्षित्वेन स्वस्यैवानुभवसिद्धत्वाज्ज्ञातत्वमस्तीति भावः ॥ शावं ॥

चेतनत्वं तु पश्चात् आत्मनिश्चयाभावे शिष्यः पृच्छति कोऽहमिति देहेन्द्रियादीनामपि ५४
वा.वृ. ६ हेत्वर्थे वाच्ययोस्तादात्म्यं न संभवतीति यतः कारणे दृश्ययोस्तादात्म्यं संभवतीति कृत्वा नानुपपत्तिरित्यर्थः
द्वितीयादेपसमाधानेन चतुर्थी देयस्यापि समाधानं जातमिति द्रष्टव्यं चेतन एव जीव इत्युक्तं चेतनस्य जीव
6 त्वे उपपत्तिमाह यस्त्वं पृच्छसीति अचेतनस्य प्रश्नत्वानुपपत्तेः जीवस्य चेतनत्वमुपपन्नमित्यर्थः देहेन्द्रियादीना
मपि चेतनवत् अवभासमानत्वमेव न तु चेतनत्वं तत्साक्षिण स्तत्त्वमसि अहं ब्रह्मास्मि अयमात्मा ब्रह्मेत्यादि
श्रुतिभ्यो ब्रह्मत्वाभ्युपगमात् चेतनत्वं सिद्धमित्येतदर्थं हृदि निधाय आचार्य आह ब्रह्मैवासीति प्रथमप्रश्ने जी
वपरयोः लक्षणस्य पृष्टत्वात् समाधानावसरे जीवस्यैव लक्षणमुक्तं न परस्येति नशंकनीयं ब्रह्मैवासी
टि ५१ त्यनेन देहेन्द्रियसाक्षिणश्चेतनस्य जीवस्य ब्रह्मत्वाभिधानात् सर्वसाक्षी चेतनः परमात्मेत्युक्तमेव ट शि
ष्यो वाक्यश्रवणानन्तरं पदार्थद्वयं सम्यग्न विदित्वा स्फुटं विविदिषुराचार्यमाह पदार्थमेव जानामि नाद्या
पि भगवन् स्फुटं अहं ब्रह्मेति वाक्यार्थं प्रतिपद्ये कथं वद ९ टीका अद्यापि भगवत्त्वेव मुक्तवत्यपि स्फुटं पदा
र्थमेव न जानामि अतो वाक्यार्थं कथं प्रतिपद्ये अतस्तदर्थं स्फुटं वदेत्यन्वयः अहं ब्रह्मेति कथं प्रतिपद्ये अ
तः पदार्थं वदेत्यनेन पदार्थज्ञानादर्वाचीनकाले वाक्यार्थज्ञानस्यासंभवात् पदार्थज्ञानमेव तावद्दृ
ढीक्रियतामित्ययमर्थोऽवगम्यते ९ मनुष्याणां सहस्रेषु इति भगवद्वचनात् मुमुक्षोः पुरुषस्य दुर्ल
ना ५५ भत्वात् प्रश्नामात्मविषयत्वाच्च पुनः पुनः शिष्यप्रश्ने गुरोर्न उद्वेगः स्यात् किंत्वनुमोदनमेव अतो शिष्यमा
त्मावगमपर्यन्तं बोधयितुं प्रथमं तावच्छिष्यस्य प्रश्नमनुमोदते सत्यमाह भवानत्र विगानं नैव विद्यते हेतुः
पदार्थबोधो हि वाक्यार्थावगतेरिह १० टीका अत्र अस्मिन्नर्थे विगानं विप्रतिपत्तिः इह तत्त्वमस्यादिवाक्य
पदार्थज्ञानस्य वाक्यार्थावगतिसाधनत्वं अन्वयव्यतिरेकसिद्धमित्याह हेतुः पदार्थेति यतः एवं अतो विज्ञा
नं नैव विद्यत इति योजना १० तस्मात्तत्त्वंपदार्थौ निरूपयितुं प्रसिद्धानुवादेन अप्रसिद्धं निरूपणीयमिति ६

न्यायेन प्रसिद्धत्वमर्थं तावत्तं निरूपयति अंतःकरणतद्वृत्तिसाक्षीचैतन्यविग्रहः आनंदरूपः सत्यः सन् किं नात्मानं प्रप
द्यते ॥ टीका अंतःकरणं बुद्धिः तद्वृत्तिर्मनः आगमको मनोन्यत्रेत्यत्र मनसो धीवृत्तित्व प्रतिपादनात् आचार्येण
तद्वृत्तिग्रहणेन अंतःकरणस्यैव स्ववृत्तिसाक्षित्वं परिहृतं निरालंबनज्ञानमेव आत्मा तस्य अविद्याकल्पित
सालंबनत्वेनैव साक्षित्वं तथा सत्यौदार्येव निर्विकल्पकज्ञानस्वरूपेणैव आत्मनि श्रुतिपाद्यमानेन कस्यापि
सानं प्रतिपत्तिः स्यादिति स्थूलारुंधतिप्रदर्शनद्वारा मुख्यारुंधतिसूचनवत् अंतःकरणादिसाक्षित्वेन आत्मानं
प्रतिपाद्य तत्प्रतिपत्त्यनंतरं साक्षित्वेनैव सिद्धमात्मानं निरालंबनतया दर्शयति चैतन्यविग्रह इति अथवा देहेंद्रि
यादिसाक्षीति वक्तव्ये किमंतःकरणतद्वृत्तिसाक्षीत्युक्तमिति शंकापां बुधा सहैव देहेंद्रियादिसाक्षी अत्र गात्मा
बुद्धितद्वृत्तिसाक्षी तु स्वयमेवेत्यभिप्रेत्य शुद्धं तमात्मानं दर्शयति चैतन्यविग्रह इति चैतन्यं ज्ञानविग्रहः स्वरूपं यस्य
स तथोक्तः स्वयंप्रकाश इत्यर्थः इदानीं ज्ञानस्वरूपत्वेन आत्मनो भोगसाधनाद्यभावात् सुखाभावशंका
यामाह आनंदरूप इति कोह्येवान्यात्कः प्राण्यात् यदेष आकाश आनंदो न स्यात् एषह्येवानंदयाति सुषुप्तिकाले
सकले विलीने तमसावृतः स्वस्वरूपमहानंदं भुंक्ते विषयविवर्जितं आनंदो ब्रह्मेत्यादिश्रुतिभ्यः सुषुप्तेः प्रत्यक्षः
प्रबोधकं हि प्रबुद्धस्य सुखमहमस्वाप्समिति कथयति अतो प्रत्यक्षानुभवाभ्यां च आत्मनः आनंदरूपत्वसिद्धमि
ट२४ त्यर्थः तर्हि लोके ज्ञानानंदयोः लौकिकत्वदर्शनात् आत्मनो ज्ञानानंदरूपत्वे लौकिकत्वेन अनित्यशंकायामा
ह सत्य इति अंतःकरणवृत्तिप्रतिबिंबितज्ञानानंदयोरेव लौकिकत्वं न स्वरूपानंदज्ञानस्य अवस्थात्रयेपि सत्य
त्वदर्शनात् निरवयवत्वेन रूपरसादिविरहितत्वात् क्रियाश्रयत्वाभावात् षड्भावविकाररहितत्वाच्च तस्य
सत्यत्वं सिद्धमित्यर्थः उक्तस्वरूपे निःसंशयज्ञानोपायमुपदिशति सत्यानंदस्वरूपं धीसाक्षिणं बोधविग्रहं

शिष्यस्याप्रमाणं च देहादेरनात्मत्वदर्शीनेन तदात्मबुद्धित्यागो घटत इति ७

वा.वृ. चिंतयेदात्मतया नित्यं त्यक्त्वा देहादिगां धियं १२ विज्ञानरूपस्यैव आत्मनः सत्यत्वं आनंदत्वं साक्षित्वं चैतत्सर्वदर्शी
६ नार्थः पूर्वश्लोकोक्तान्येव पदानि अनयारीत्या विशेषणविशेष्यरूपेणैव पुनरुच्यंते यस्माद्विलक्षणो बोधः सर्वप
दार्थैः स उच्यते साक्षित्वमपि बोद्धृत्वमविकारि तथात्मनः इति ज्ञानरूपत्वं पदार्थत्वं लक्ष्यते च एवंभूतमात्मा
नमात्मतया चिंतयेदहमिति चिंतयेत् यतः नित्यचिदनुसंधानान्न च शोकेन बाध्यत इति वसिष्ठवचनात् चि
रं चिंतनीयमिति भावः त्यक्त्वा देहादिगां धियमिति देहादावात्मबुद्धिं त्यक्त्वेत्यर्थः धीसादिगामित्यत्र धीशब्देन
कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एवेति श्रुतेः कामादि सर्वमपि गृह्यते १२ ॥
आत्मचिंतनस्य देहाद्यात्मबुद्धित्यागपूर्वकत्वमुक्तं देहादावात्मबुद्धेश्चिरं निरूढत्वात् तत्त्यागो न घटत इति मत्वा
तत्त्यागोपायं देहादेरनात्मत्वं शिष्यस्य दर्शयति रूपादिमान्यतः पिंडस्ततो नात्मा घटादिवत् वियदादिमहाभूतवि
कारत्वाच्च कुंभवत् १३ टीका पिंडो देहः अनात्मा रूपादिमत्त्वात् घटादिवत् रूपादिमत्त्वं सर्वेषां वस्तूनां प्रत्यक्ष
सिद्धत्वात् घटादिदृष्टांतः महाभूतविकारत्वात् कुंभस्यैव प्रत्यक्षसिद्धत्वात् कुंभदृष्टांतः १३ नन्वेवं पिंडस्याना
त्मता दर्शनमात्रेण आत्मचिंता घटते किंतु आत्मस्फुटपरिज्ञानेनापि भवितव्यमिति मत्वा आत्मानं स्फुटं परि
ज्ञातुं तत्स्वरूपं व्यक्तं वदत्याचार्यमाह अनात्मा यदि पिंडोयमुक्तहेतुबलान्मतः करामलकवत्साक्षादात्मानं प्रति
पादय १४ टीका अयंशब्देन पिंडस्य दृश्यत्वेनापि अनात्मत्वं उच्यते अयं देहः पूर्वोक्तहेतुना अनात्मेति संमतश्चे
त् भवतु नाम अनात्मत्वं देहस्य नैतावता आत्मचिंता सिध्यति अतः करस्थामलकवस्तु यथा प्रत्यक्षं दृष्टः एवं
साक्षादपरोक्षत्वेन एवंभूतस्वरूपोऽहमित्यपरोक्षतया साक्षादात्मानं प्रतिपादय इत्यर्थः १४ पूर्वमंतःकरणतद्वृत्ति
साक्षीत्यादिश्लोकोक्तमेव इदानीं स्फुटं प्रतिपादयति विभुः आदौ साक्षित्वेन आत्मानं प्रतिपादयति घटद्रष्टा घटा ॥ ६

भिन्नः सर्वथा न घटो यथा देहद्रष्टा तथा देहो नाहमित्यवधारयेत् १५ टीका घटद्रष्टा घटाद्भिन्नः सन् सर्वप्रकारेण
यथा घटो न भवति तथा घटद्रष्टृवत् देहद्रष्टा अहं तथा न देहः किंतु स्वदृश्याद्देहाद्भिन्न इत्यर्थः अत्रार्थे प्रयोगश्च म॰२२
६ देहद्रष्टा स्वदृश्याद्देहाद्भिन्नः द्रष्टृत्वात् घटद्रष्टृवदिति श्रुतिरपि एतद्वै तदक्षरं गार्गी ब्राह्मणा अभिवदंति अदृष्टं
द्रष्टृ अश्रुतं श्रोतृ अमतं मंतृ अविज्ञातं विज्ञातृ इति १५ एवं घटद्रष्टृवत् देहद्रष्टृत्वेन आत्मानं दर्शयित्वा इदानी
मिंद्रियस्य देहद्रष्टृत्वदर्शनात् तस्यैवात्मत्वशंकायामिंद्रियसाक्षित्वेन एवं इंद्रियद्वारा देहद्रष्टृत्वेन साक्षात्स्वस्यें
द्रियस्यापि भिन्नत्वं देहोक्तानुमानेन क्रमादिंद्रियादिद्रष्टृत्वेनात्मानं दर्शयति एवमिंद्रियद्रष्टाहमिंद्रि
याणि तु निश्चितं मनोबुद्धिस्तथा प्राणो नाहमित्यवधारय १६ इंद्रियद्रष्टाहं नेंद्रियं किंतु स्वदृश्यादिंद्रिया
द्भिन्नः द्रष्टृत्वात् देहद्रष्टृवत् एवं मन आदिष्वप्यवबोध्यं स्वस्वार्थग्राहकस्फुटग्रहणादिंद्रियाणां आत्मत्वं माप्राप
टत्वादींद्रियधर्मालोचनरूपत्वस्यानुभवसिद्धत्वात् दृष्टिकोपि दृश्यत्वं सिद्धमेवेति भावः तथापि मनस एवं द्रष्टृ
यद्रष्टृदर्शनात्तस्यैवात्मत्वप्राप्तौ पूर्वोक्तिप्रकारेण मनोद्रष्टृत्वेनात्मानं दर्शयति मन इति तस्य संकल्पविक
ल्पसंशयात्मकत्वेन दृश्यत्वमनुभवसिद्धमित्यर्थः एवं चेन्निश्चयात्मबुद्धेरात्मत्वं स्यादित्याशंक्याह बुद्धिरिति त्मकापा॰५६
एकस्यैव पुरुषस्य क्रियादिभेदेन वाचकत्वादिसंज्ञा एवमंतःकरणे संशयनिश्चयादिवृत्तिभेदात् मनो-
बुद्धिसंज्ञकं अतो बुद्धिसंज्ञकस्यांतःकरणस्य निश्चयात्मकत्वेन साक्षिकत्वेन च दृश्यत्वं सिद्धमित्यर्थः तर्हि येन
चेष्टा यापि तस्माद्वातोः प्राणशब्दवाच्यस्य तस्य चेष्टा यापि चेतनधर्मत्वात् तस्यैव साक्षित्वोपपत्तौ स एव आ
त्मा स्यादित्यत आह तथा प्राण इति तथा देहेंद्रियादिवदात्मा उक्तकुसनिश्चयासात्मकस्य प्राणस्य दृश्यत्वे
नानुभवसिद्धत्वात् सुषुप्तौ प्राणसत्त्वेपि विषयज्ञानस्याभावाद्चेतनत्वमनुभवसिद्धमित्यर्थः १६ ननु दे

९

वा॰बु॰ देहेंद्रियादिसंघात एव साक्षीत्यत आह संघातोऽपि तथा नाहमिति दृश्यविलक्षणे द्रष्टारमनुमानेन निर्मुलं स्पष्टधा
८ रय १७ टीका तथा देहेंद्रियादिवत् न संघातोऽपि साक्षी भवति इदं शरीरं कौंतेय इति तद्विद इति स्मृतेः संघातसाक्षि मा१२
४ त्वेन क्षेत्रज्ञस्य प्रतिपादितत्वात् संघातस्य दृश्यत्वं सिद्धमित्यर्थः उक्तमर्थं स्पष्टीकुर्वन्नस्य प्रयोगमुपसंहरति
रतीति अत्रेदमनुमानं देहादिसंघातः स्वव्यतिरिक्तद्रष्टृको [illegible] यथा घटः तथा च अयं संघातो दृश्यः तस्मा
त्स्वव्यतिरिक्तद्रष्टृक एवेति १७ एवं देहेंद्रियादिसंघातसाक्षित्वेन आत्मा दर्शितः देहेंद्रियादीनामपि दृश्यत्वेन
अनात्मत्वं अर्थादुक्तमिति नीदृश्यत्वेनैव अचेतनत्वे सिद्धेपि देहेंद्रियादीनां प्रकारांतरेणाचेतनत्वं ज्ञाप ६
यत् तद्विलक्षणतया चैतन्यविग्रहत्वेन आत्मानं प्रतिपादयति देहेंद्रियादयोऽभावा हानादिव्यापृतिक्षमाः
यस्य सन्निधिमात्रेण सोहमित्यवधारय १८ टीका अत्र मात्रशब्दो अवधारणे यस्य चेतनस्य सन्निधिमा
त्रेण देहादयो हानोपादानव्यापारसमर्थाः स्युः सोहमित्यवधारयेत्यन्वयः देहेंद्रियादीनां चैतन्यसान्निध्या
देव हानादिसंसारव्यापारदर्शनेन तेषां शाकटादिवदचेतनत्वं दर्शितं १८ नन्वविकृतचेतनसन्निधिमात्रे
ण बुध्यादिप्रवृत्त्यनुपपत्तेः चेतनबुध्यादिप्रवृत्त्यनुकूलोविकारोऽवक्तव्यः तथा च सति अस्य कोपमवि
त्यर्थं इत्यादिस्मृतिविरोधः स्यादित्याशंक्याह अनापन्नविकारः सन्नयस्कांतवदेव यः बुध्यादीश्चालयेत्
त्यकं सोहमित्यवधारय १९ टीका अनापन्नविकारः सन्निति प्रवृत्त्यनुकूलविकारांतरशून्योऽपि यथा अयस्कां
तोपलः स्वसंनिधिवशात् लोहव्यापारहेतुः तथा प्रत्यगात्मापि स्वसंनिधिवशात् अव्यापार एव सन् बु
ध्यादिचलनहेतुरित्यर्थः १९ ननु शाकटादेरचेतनत्वं चेतनस्य तद्भिन्नत्वं च दृष्टं कुतो देहादेरचेतन-
त्वं चेतनस्य तद्भिन्नत्वं च दृष्टमित्यत्राह मृतो जडात्मवद्भाति यत्सांनिध्याज्जडोऽपि देहेंद्रियमनःप्राणा
सोहमित्यवधारय २० टीका सुषुप्तिमूर्छामरणावसरे चैतन्यस्याव्यभिचारित्वाद्दृश्यत्वेन अचे- ८

तन्नत्वानुमानाच्च अचेतनत्वं दृष्टमेव तथापि देहादय आत्मनः मिथ्यात्वाद् अध्यापतया चेतनवद्भान्ति अतस्तयोश्चेत
नाचेतनत्वे दृष्टत्वमिति भावः स्वप्ने देहेन्द्रियादीनामभावात् दृश्यत्वे नाचेतनत्वं युक्तं कुतो मनसो चेतनत्वमित्य
त आह अगमत्रे मनोन्यत्र सांप्रतं च स्थिरीकृतं एवं यो वेत्ति धीवृत्तिं सोहमित्यवधारय २२ टीका एतावंतं काल
मे मन अन्यत्र गंगादौ गतं तत्स्मरणं त्वं इदानीं स्थिरीकृतं सन्निहितवस्तु विषयं करोमीति गमनादि धर्मित्वो
मनसो दृश्यत्वस्यानुभवसिद्धत्वात् मनसो अचेतनत्वं सिद्धमित्यर्थः २१ मनसो धीवृत्तित्वादेव दृश्यत्वे सिद्धे सत्यपि
वृत्तिमत्वाधियो दृश्यत्वं नोपपद्यत इत्यत आह स्वप्नजागरिते बुद्धिः भावाभावौ धियो यतः तथा यो वेत्त्यविक्रियः साक्षी सो
हमित्यवधारय २३ टीका बुद्धिः स्वप्नजागरिते वेत्ति तदा सत्त्वाद्भवत्सुषुप्तिं तु न वेत्ति तत्र बुद्धेरभावादेव आत्मा त्वप
च वेत्ति तथा स्वप्नजागरे तयो धियो भावं सुषुप्तावभावं च वेत्ति अतो बुद्धिं कक्षसज्जावात् बुद्धेः दृश्यत्वं सिद्धमित्यर्थः
धियामिति बहुवचनेन बुद्धीनां त्रैलोक्यवर्तित्वं कादित्वादिकमुच्यते नन्वात्मनोपि सुषुप्तावभाव एव तदा स्वसत्ता
वद्धिज्ञानाभावात् इत्याशंक्याकामः संकल्पाद्यनेकविकारित्वादर्शितापाबुद्धेस्तु आत्माभावो युक्तः तस्मात् त्विहोन्निर्विकारि
त्वेन निरस्तत्वादात्मनः सुषुप्तावपि सत्त्वं सिद्धमित्यभिप्रेत्याह अविक्रिय इति अविक्रियपदेन सुषुप्तावात्मनः
सत्त्वप्रतिपादनात् साक्षात्पदं किमर्थमिति न शंकनीयं एतेनाविक्रियपदेनात्मनो वस्थात्रयेपि सत्त्वेन प्रतिपा
दितेपि सुषुप्तौ स्वसत्तापरिज्ञानाभावः प्रयुक्तः स्वसत्त्वं न निराकृतमिति कृत्वा तन्निराकरणाय आह साक्षीति
तत्र साक्षात्प्रकाशिते स्वयमेव प्रकाशत इत्यर्थः अयमाशयः सुषुप्तौ धीवृत्त्यभावेप्यात्मनः स्वयंप्रकाशत्वेन ब
त्वांतरनिरपेक्षत्वात् तस्य प्रकाशसंभवात् सुषुप्तौ स्वसत्ताभावो असिद्ध इति अपि च धीवृत्त्यभावेपि सुखमहम
स्वाप्सं न किंचिदवेदिषमित्युत्थितस्य सुषुप्तिगतसुखादि स्मरणदर्शनात् अननुभूते स्मरणासंभवात्केव

ग्रा-वृ- स्तोपनिषदि सुषुप्तिकाले तिचैव दंहास्मार एतावीश्वरप्राज्ञौ चैतन्यदीप्ताभिरतिसूक्ष्माभिरज्ञानवृत्तिभिरानंद
८ मनुभवतः इति च विवरणे सुषुप्तावज्ञानं तु स्वाकारेण सुखाकारेण साक्ष्याकारेण च परिणमत इति च स्वानुभवा
9 त्तित्व प्रतिपादनात् सुषुप्तावज्ञानस्य स्वसाक्ष्याकारेण परिणताज्ञानवृत्तिप्रतिबिंबितचैतन्यविषयत्वेनांतः
करणसाक्षात्कारस्य विद्यमानत्वात् तदभावस्तत्र परिणामाभावो सिद्ध इति वा साक्षात्पदार्थः अथवा साक्षादित्य
स्यायमर्थः आत्मा त्रयं चवेतीत्युक्तमिदमनुपपन्नं जाग्रत्स्वप्नयोः बाह्याभ्यंतरकरणवेद्यत्वादित्याशंक्याह साक्षा
दिति इंद्रियाणां जडत्वेन स्वतः प्रकाशत्वासंभवात् आत्मैव बाह्येंद्रियांतरिंद्रियसापेक्षतः सन् जाग्रत्स्वप्नौ वेत्ति
स्वप्नमंतःकरणवृत्तिद्वारा वेत्ति सुषुप्तिमन्यनिरपेक्षतया साक्षाद्वेत्ति तस्मादात्मैवावस्थात्रयसाक्षीति सिद्धं २२
एवं देहादेरचेतनत्वेनात्मानात्मनामर्थादुक्तात द्विलक्षणत्वेनापी चैतन्यविग्रहं आत्मानं प्रतिपाद्य तद्देहादिविल
क्षणत्वेन सिद्धं चेतनत्वं सदृष्टांतमुपसंहरति घटावभासको दीपो घटादन्यो यथेष्यते देहावभासको देही तथा
हं बोधविग्रहः २३ टीका अयमाशयः यथा दीपः स्वप्रकाशरूपत्वात् स्वावभास्याद् घटाद्विलक्षणत्वेन प्रका
शरूपो भवति एवं स्वावभास्याद चेतनाद्देहाद्विलक्षणत्वेनात्मा बोधविग्रहः चैतन्यस्वरूप इति यावत् एतेना
नुमानद्वयं सूचितं विमतो देही स्वावभास्याद्देहाद्विलक्षणः तदवभासकत्वात् दीपवत् आत्मा चैतन्यविग्रहः
देहादिविलक्षणत्वात् घटद्रष्टृवत् इति आत्मनश्चैतन्यविग्रहत्वे श्रुतिरप्यस्ति सत्यं ज्ञानमनंतं ब्रह्म विज्ञान
मानंदं ब्रह्म एको देवः सर्वभूतेषु गूढः इत्यादि एतेन देहादेरचेतनत्वं चैतन्यस्य तद्भिन्नत्वं कुतो दृष्टमित्येतद
पि निरस्तं आत्मनो देहादिविलक्षणत्वप्रतिपादनात् २३ इदानीं क्रमप्राप्तानंदरूपत्वेनात्मा प्रतिपाद्यते पुत्रवित्ता
दयो भावा यस्य शेषतया प्रियाः द्रष्टा सर्वप्रियतमः सोहमित्यवधारय २४ टीका आत्मनस्तु कामाय सर्वं प्रियं भव

तिरस्यादि श्रुतिन्यायेन पुत्रवित्तादयोपि भावाः पदार्थाः यस्य द्रष्टुः शेषतया संबंधितया अनुकूलत्वेन प्रियाः प्रेमा
स्पदाः स द्रष्टा सर्वेभ्योपि प्रियतमः सर्वेभ्यः पुत्रादिभ्यः उत्कृष्ट प्रेमास्पदः अतः आत्मनो निरुपाधिकतया आनंदरूप
त्वं अनुभवसिद्धमित्यर्थः २४ द्रष्टा सर्वप्रियतमः इति द्रष्टुः परप्रेमास्पदत्वेनानंदरूपत्वमुक्तं इदानीं तस्यैव काल
त्रयेपि परप्रेमास्पदत्वेनैव हेतुना नित्यात्मनः क्रमप्राप्तं सत्यत्वं दर्शयति परप्रेमास्पदतया मा न भूवं अहं सदा भूयास
मिति यो द्रष्टा सोहमित्यवधार्य २५ टीका अहं भूतकाले मा अभूवमिति न किंतु अभवमेव कथं भूतकालेप्यव
स्थानमस्ति अनादित्वात् मम तत्राप्यवस्थानमस्तीत्यर्थः एवं भूतकालेपि परप्रेमास्पदत्वं किंच सदा भूयासमिति
सर्वदेति कालत्रयं विवक्षितं तत्र भविष्यत्कालावस्थानस्य प्रतिपादितत्वात् सदेत्यनेन वर्तमानभविष्यत्कालयो
ग्रहणं वर्तमानभविष्यत्कालयोः अहं स्यां कालद्वयेपि ममावस्थानेन भवितव्यमित्यर्थः देहादेरनित्यत्वेन स
र्वदा अवस्थानाभावेपि आत्मनो नित्यत्वेन कदाचिदपि नाशाभावात् अथ च तस्य मम सर्वदा अवस्थाने
संभवतीत्यर्थः एवं कालत्रयेपि परप्रेमास्पदतया प्रसिद्धो यो द्रष्टा सोहमित्यवधारयेत्यन्वयः अतः प्र
वस्य परप्रेमास्पदत्वाभावात्तस्य कदाचित् प्रतिभानमंतरेण कालत्रयेप्यवस्थानासंभवात् आत्मनः
परप्रेमास्पदत्वात्कालत्रयेप्यवस्थानसंभवात् सत्यत्वं सिद्धमित्यर्थः आत्मसत्तानुप्रवेशेन तत्कल्पितानां मा५४
सर्वेषां वस्तूनां सत्ताप्रतीतिः संभवतीति न स्वतः इति प्रसिद्धायः मा न भूवमिति यत्र प्रयोगे अहं आगमप्रतिषेधः
२५ एवमंततः करणेन तद्धातिसादीत्यादि श्लोकोक्तमेव एतदंतैः श्लोकैः आत्मनः साक्षित्वेन चैतन्यविग्रहत्वे
नानंदत्वेन सत्यत्वेन करतलामलकवत् स्फुटं प्रतिपाद्य इदानीं फलितार्थस्य साक्षित्वेन बोधस्य तत्त्वम
स्यादिवाक्यैः त्वंपदार्थत्वमाह यः साक्षिलक्षणो बोधस्त्वंपदार्थस्स उच्यते साक्षित्वमपि बोद्धृत्वमविकारितत्

येयं विशेषणमित्याहुर्भेदकं च विशेषणं विशेष्यं तु प्रधानं स्यादप्रधानं विशेषणम्

वा.वृ.
१०
10

पात्मनः ॥२६॥ टीका ॥ साक्षितया ले ...त इति साक्षी तल्लक्षणमुच्यत इति तत्त्वमस्यादिवाक्यतत्त्वविशेषः ननु अवि
कारिणः आत्मनः साक्षित्वाभावाद्विकारं प्राप्नुयादेव तस्य साक्षित्वमित्याशंक्याह साक्षित्वमपीति स्वाध्यस्त स्तं
सर्वसाक्षात् अन्यानपेक्षतया इदं ते प्रकाशयतीति साक्षी अविद्यकम् तस्यात्मनः स्वयंप्रकाशत्वेन तत्र कल्पि
तानां तत्प्रकाशेनैव प्रकाशसिद्धेः तत्स्वरूपमीहत्य क्रियाश्रयत्वप्रयासाभावात् दीपवदविकारित्वेनैवात्म
नः साक्षित्वं ज्ञानस्वरूपत्वाद्बोधत्वं च घटते ॥२७॥ उक्तमर्थम् उपसंहरति देहेन्द्रियमनःप्राणाहंकृति
भ्यो विलक्षणः प्रोज्झिताशेषषड्भावविकारस्त्वंपदाभिधः ॥२८॥ टीका ॥ त्वंपदेनाभिधीयत इति त्वंपदाभिधः
१० यः साक्षिलक्षणो बोधः सः असदृशः जडदुःखात्मकेभ्यो देहेन्द्रियादिभ्यो विलक्षणः विसदृशः अत एव प्रो
ज्झिताशेषषड्भावविकारः परित्यक्ताः सत्तादिषड्भावविकारा अंतःकरणद्वयविवक्षया बुद्धिरेवाहंकारः
मन एव चित्तम् अतो अहंकृतिशब्देन बुद्धिरुच्यते मनःशब्देन चित्तमुच्यते ॥२९॥ यद्यपि सत्यानंदस्वरूपप्र
काशात्वंपदार्थप्रतिपत्तेरेव पुरुषार्थसिद्धिः तथापि उभयपदार्थज्ञानस्य परमपुरुषार्थसाधनवाक्यार्थाव
गतिहेतुत्वात् क्रमप्राप्तं तत्पदार्थं प्रतिपादयति त्वमर्थमेवं निश्चित्य तदर्थं चिंतयेत्पुनः अतद्व्यावृत्तिरूपेण
साक्षाद्विधिमुखेन च ॥३०॥ टीका ॥ एवं निश्चित्येति अंतःकरणतद्वृत्त्यादिना पूर्वोक्तं त्वंपदार्थं प्रतिपादकवा
क्यश्रवणमननाभ्यां सर्वशास्त्रतत्त्वमर्थं निःसंशयेन ज्ञात्वेत्यर्थः तदर्थं चिंतयेदित्युक्तो पुनश्चिंतयेदित्य
नेनापि निःसंशयज्ञानपर्यंते पुनःपुनस्तत्पदार्थप्रतिपादकवाक्यश्रवणमननाभ्यां संकुर्यादित्यु
क्तं भवति ननु यतो वाचो निवर्तंते अप्राप्य मनसा सह इति श्रुत्या वाङ्मनसोरप्यविषयत्वश्रवणात् १०

कथं चिंतयेदित्यत आह अतद्व्यावृत्तिरूपेणेति तत्र भवतीत्यतत् अततो व्यावृत्तिः अतद्व्यावृत्तिः तद्रूपेणेत्यं
यमाशयः इदं ब्रह्मेति नं गम्यां हि कृतया विषयीकृत्य चिंतयितुमशक्यत्वेपि अथात आदेशो नेति नेतीति
श्रुत्या ब्रह्मणः कार्यकारणरूपत्वादेः प्रतिषिद्धत्वात् कार्योपाधिप्रयुक्तं जीवस्य कर्तृत्वादिकं कारणो
पाधिप्रयुक्तमीश्वरस्य सर्वज्ञत्वादिकं पारमार्थिकं न भवति किंतु मायिकमेवेति कृत्वा कार्यकारण
त्वदीर्घत्वह्रस्वत्वादिधर्मत्यागेन निषेधावधिभूतं स्वरूपं चिंतयेदिति तेनैव लमतद्व्यावृत्त्या स्वरूपपरि
ज्ञानसंभवात् तदर्थचिंतानपेक्षते इत्यत आह साक्षाद्विधिमुखेनेति सत्यं ज्ञानमनंतं ब्रह्मेत्यादिब्रह्मस्व
रूपप्रतिपादकवाक्येनेत्यर्थः अयमभिप्रायः सत्यं ज्ञानमनंतं ब्रह्म आनंदो ब्रह्मेत्युक्ते ज्ञानानंदादी
नां गुणत्वेन धर्मिकत्वेन प्रसिद्धत्वात् ब्रह्मणः एकरूपत्वात् कथं तेषां बहूनां निर्गुणस्वरूपब्रह्मत्व
मित्यनुपपत्तौ सत्यत्वेन ब्रवीति ज्ञानानंदादीनां गुणत्वेन धर्मिकत्वेन ब्रह्मत्वानुपपत्तावपि निर्वि
कल्पकज्ञानैकस्वरूपं ब्रह्मणोऽनृतजडदुःखात्मकत्वशंकायाः व्यावर्तकत्वेन सत्यत्वानंदत्वा
स्यपि ब्रह्मरूपेणैवोक्तत्वात् सत्यज्ञानानंदस्वरूपं वस्तु ब्रह्मेत्यत्र गम्यते तद्वत्ता वा अनृतजडदुःखत्वादि
विलक्षणं ब्रह्मेति वा सत्यत्वादिपदवाच्यत्वाभावेपि लक्षणत्वोपपत्तेः सत्यं ज्ञानमनंतं ब्रह्मेत्यादिब्रह्मस्व
रूपप्रतिपादकवाक्यैर्विधिमुखेनेतरनिषेधमंतरेणापि तदर्थं चिंतयेदिति २८ एवं तदर्थचिंतापो
ऽपायद्वयमुक्तं इदानीमतद्व्यावृत्त्या चिंतनार्थमततो व्यावर्तयन् तदर्थं निरूपयति निरस्ताशेषसंसार
दोषोऽस्थूलादिलक्षणः अपहतादिगुणकः परात्तमोमलः २९ टीका परात्तमोमलः श्रुति
प्रमाणे तमोमल इति यावत् तमस्वतमोज्ञाने प्रकाशविरोधित्वात् अपनोदत्वाद्गुणतत्तमस्त्व

वा॰वृ॰ प्रज्ञानस्य तद्देवमलं इव मलं आरंभो हि गतमलवत् स्वात्मस्वरूपं मलिनं करोति तत् तदृषि लपनोद्यत्वाच्च गुण
११ तोमलः पराकृतः तमो मलो यस्मिन् स तथोक्तः अत एव निरस्ताशेषसंसारदोषः संसारदोषः संस्कारप्र
वृत्तिः दोषशब्देन रागादय उच्यन्ते दोषा रागादयः स्मृता इति वचनात् निरस्ताशेषसंसारदोषो यस्मिन् स
तथोक्तः एतेन जीवाश्रयमिथ्याज्ञानतत्कार्यदोषप्रवृत्तिजन्मदुःखानि च ब्रह्मणि न सन्तीत्युक्तं किंच
एतेन जीवस्य तदेकत्वज्ञानान्मिथ्याज्ञानापाये दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये त
दनन्तरापायादपवर्ग इति गौतमवचनात् मिथ्याज्ञानापाये रागाद्यपायः तस्मिन् सति प्रवृत्त्यपायः
प्रवृत्त्यपाये जन्मापायः तस्मिन् सति दुःखापायः स्यादिति सर्वोत्कर्षो व्यंजितो भवति इदानीं प्रपंचान्तर्गत
सर्ववस्तुवैलक्षण्येन लक्षयति अस्थूलादिलक्षणः स्थूलसूक्ष्महृस्वदीर्घत्वादिलक्षणं निखिलो
के सर्ववस्तुनि अयं तु न तथा अस्थूलमनण्वहृस्वमदीर्घमजमव्ययमित्यादिश्रुतेः पुनरुक्तमेव प्रा
पंचवैलक्षण्येन निरूपयति अशब्दत्वादिगुणक इति शब्दस्पर्शत्वपीठि अनाद्यन्तवत्त्वादिगुणकः को
यप्रपंचः अयं तु तद्रहितः अशब्दमस्पर्शमरूपमव्ययमित्यादिश्रुतेः २९ एवमतत्त्वावृत्त्या तदर्थं निरूप्य
इदानीं विधिमुखेन चिंतनाय श्रुतिनिर्दिष्टविधिस्वरूपं निरूपयति निरस्तातिशयानंदः सत्यः
प्रज्ञानविग्रहः सत्तास्वलक्षणः पूर्णः परमात्मेति गीयते ॥टीका॥ निरस्तामनुष्याद्युत्तरोत्तरशतगुणा
तिशयानंदो यस्मिन् स तथोक्तः अपरिमितानंदरूपः लोके आनंदस्यानित्यत्वदर्शनात् आत्म
नः आनंदरूपत्वेन अनित्यत्वं प्राप्तं काम्यान्तःकरणवृत्त्यभिव्यक्तानंदस्यैव अनित्यत्वं न स्वरू
पानंदस्येत्याह सत्य इति ननु आनंदस्य वेद्यत्वात् कथं सत्यत्वमित्यत आह प्रज्ञानविग्रह इति स्व ११

रूपानंदस्य ज्ञानरूपत्वात् तेषुत्वानुपपत्तेः सत्यत्वं सिद्धमित्यर्थः लोके ज्ञानस्यानित्यत्वदर्शनाद् आत्मनो ज्ञानस्व
रूपत्वे अनित्यत्वं स्यादित्याशंकायामाह सत्तास्वलक्षण इति सत्तास्वलक्षणः स्वज्ञानस्वरूपः आत्मनः सत्ताया
अपि घटादिवस्तुसत्तावत् परिच्छिन्नत्वं स्यात् तत्राह हरीति इति घटादीनां स्वतः सत्तैव नास्ति किंतु आत्मसत्ता
समवायात् सत्वं अतः सर्वगतसर्वाधिष्ठानभूतात्मसत्ताया अपरिच्छिन्नत्वात् तस्मिन् मायाकल्पित
घटादि समवेतोऽर्थः ननु सत्यानंदस्वरूपं धीसाक्षिणमित्यत्र सत्यानंदस्वरूपत्वस्य श्रुतिप्रतिपादितत्वात्
किमर्थं निरस्तातिशयानंदः सत्यप्रज्ञानविग्रह इत्यनेनापि पुनः प्रतिपाद्यत इति चेन्न एवं शंकनीयं
उभयत्र कथनस्य प्रयोजनवत्त्वात् जीवपरयोरैक्यं तत्त्वम्पदयोरेकरूपत्वे संभवति अतस्तयोरेकरूपत्वप्रति
पत्त्यर्थं पूर्वं त्वंपदलक्ष्यत्वेन प्रतिपादितस्य जीवस्य तत्पदलक्ष्यत्वेनेति निरूपणं १० एवं क्रमात् श्लोकद्वयेनात्म
स्वभावत्वादिविधिमुखेन च विवित्यत्वेन निरुपाधिकं ब्रह्म निरूप्य तदिदानीं संशयज्ञानापमायोपाधिकं ब्रह्म सत
मेव षड्भिः श्लोकैर्दर्शयति तत्रादौ सर्वज्ञत्वसिद्धि विश्वकार्यजगन्निमित्तकारणत्वानुपपत्तौ सर्वज्ञत्वादि
लक्षणकथनेन तस्यैव जगन्निमित्तकारणत्वमर्थाज्ज्ञापयति सर्वज्ञत्वपरेशत्वे तथा संपूर्णशक्तिता
वेदैः समभ्यधिते यस्य तत् तत् ब्रह्मेत्यवधारय ११ टीका यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः तस्मादेतद्ब्रह्म ना
मरूपमन्नं च जायते इत्यादिभिः परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च इत्यादिभिश्च
वेदैर्यस्य सर्वज्ञत्वं परेशत्वं पूर्णशक्तित्वं च समभ्यधीयते तत् ब्रह्मेत्यवधारयेत्यन्वयः ११ ब्रह्मणो निमित्तकार
णत्वेऽप्युपादानकारणं किं स्यादित्याशंकायां सर्वकार्यानुगमात् तस्यैवोपादानत्वमिति दर्शयितुं आत्मविज्ञा
नात् सर्वविज्ञानश्रुतिप्रतिपादनेनात्मनः सर्वकार्यानुस्यूतत्वमर्थादाह यज्ज्ञानात् सर्वविज्ञानं श्रुतिषु प्रतिपादि

नुं

वा॰व॰ तं मदाद्यनेकदृष्टांतैस्तत्तु कुलिंगस्यवधारय ३२ टीका ॥ उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं वि
१२ ज्ञातमित्येकविज्ञानेन सर्वविज्ञाने प्रतिपादिते कथं नु भगवः स आदेशो भवतीत्याक्षेपमवतार्य यथा सोम्यैकेन मृ
त्पिंडेन सर्वं मृण्मयं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यं [illegible] दृष्टांतैस्तु
हेमते विज्ञाते इदं सर्वं विदितं भवतीत्याश्रुतौ यद्विज्ञानात् सर्वविज्ञानं मृदाद्यनेकदृष्टांतैः प्रतिपादितं ब्र तत्र४३
ह्मेत्यवधारयेत्यन्वयः अयमभिप्रायः श्रुत्युक्तमात्मज्ञानात् सर्वज्ञानं आत्मनः सर्वानुस्यूतत्वाभावेन संभव
ति अतस्तद्विज्ञानात् सर्वविज्ञानान्यथानुपपत्त्या आत्मनः सर्वानुस्यूतत्वं सिद्धं तच्चानुस्यूतत्वमुपादानत्व
मंतरेण न संभवतीत्युपादानत्वं ब्रह्मण आक्षिप्तमिति तथा च सत्यं वै प्रयोगः विमतं कार्यं स्वानुगतोपादा
नजन्यं कार्यत्वात् घटवदित्यनुमानेन प्रपंचस्य ब्रह्मोपादानत्वमुक्तं भवति यतो वा इमानि भूतानि जायंते
इत्यादिश्रुतिरपि प्रपंचस्य ब्रह्मोपादानत्वे प्रमाणं ३२ एवं प्रपंचब्रह्मणोः श्रुत्या कार्यकारणभाव उक्तः कि
मर्थं तदुक्तिरित्याकांक्षायां तावत्प्रपंचस्य ब्रह्मकार्यत्वोक्तेः प्रयोजनमाह यदानंदं प्रतिज्ञाय श्रुतिस्तत्सि
द्ध्यै जगौ तत्कार्यत्वं प्रपंचस्य तद्ब्रह्मेत्यवधारय ३२ टीका यस्मार्थतो देशकालाद्यभावेपि कल्पितजग
दपेक्षया देशकालवस्तुपरिच्छेदाभावो ब्रह्मण आनंत्यं नाम सर्वत्र सर्वदा सर्ववस्त्वधिष्ठानत्वेन सत्त्वेना
नुस्यूतत्वात् अथवा ब्रह्मण आनंत्यं नाम सजातीयविजातीयस्वगतभेदशून्यत्वं इदं तु जगत्स्थि
तिकालेपि विमृश्यमानं संभवति जगतो मायामयत्वेन परमार्थतः कदाचिदप्यभावात् एकमेवाद्वि
तीयं ब्रह्मेत्यानंत्यं प्रतिज्ञाय तस्याद्वितीयत्वसिद्धये प्रपंचस्य ब्रह्मकार्यत्वं श्रुतिर्जगौ ततः आनंदत्वं ती १२

प्रपंचस्य ब्रह्मकार्यत्वे श्रुतिसिद्धे सत्युपादानकारणकार्ययोर्भेदाभावात् ब्रह्मणः आनंदत्वं सिद्धमित्यर्थः एतेन
प्रपंचस्य ब्रह्मकार्यत्वकथनेन ब्रह्मणः आनंदत्वसिद्ध्यर्थमिति प्रयोजनमुक्तं ननु ब्रह्मज्ञानात् सुखं चेन्न ब्रह्म
ति स्वयमेव ब्रह्मणः आनंदत्वं सिद्धं भवति तथा च सति प्रपंचस्य ब्रह्मकार्यत्वोक्त्या किं क्रियत इति न शंकनी
यं यद्यपि प्रपंचस्य ब्रह्मणि कल्पितत्वेन रज्जुसर्पवदधिष्ठानज्ञानेनापबोध्यत्वात् प्रपंचाभावे ब्रह्मणः आ
नंदत्वं सिद्धं भवति तथापि प्रपंचाधिष्ठानब्रह्मविचारासमर्थान् मंददृष्टीन् मुमुक्षून् उद्दिश्य भेदस्य चैके प्रपंचे प्र
दर्६ त्यक्षसिद्धे सत्यपि ब्रह्मणः आनंदत्वं सिद्धं भवति मुख्यात् तयोः कार्यकारणभावस्य प्रतिपादितत्वात् कार्यस्य का
रणानन्यत्वादिति ब्रह्मणोऽनन्यत्वस्य श्रुतिसिद्धत्वज्ञापनार्थत्वात् कार्यकारणत्वोक्तेः एवं ज्ञापिते प्रपंचे ब्रह्मत्वे सत्यपि
ब्रह्मणः आनंदत्वसिद्धेः सत्यं ब्रह्मणः सर्वकारणत्वात् मुमुक्षूणां ब्रह्मणोऽनन्यत्वेन तेषामेव स्वाकारब्रह्म
त्वज्ञानं स्यात् ततस्तेषां प्रपंचाधिष्ठानब्रह्मविचारसामर्थ्ये जन्मैव ततो विचारोत्पन्नापरोक्षज्ञानेनाज्ञा
नतत्कार्यस्य देहेन्द्रियादिप्रपंचे नष्टे सति मुमुक्षूणामपरिच्छिन्नब्रह्माकारत्वसिद्धिः प्रयोजनमित्य
र्थो ज्ञापयते ३३ इदानीं प्रपंचाधिष्ठानब्रह्मविचारासमर्थान् मुमुक्षून् उद्दिश्य प्रपंचोपादानस्य ब्रह्मणो
विचार्यत्वे श्रुतिसंमतत्वं दर्शयति विजिज्ञासस्वेत्यादिना यद्वेदांतेषु मुमुक्षुभिः समर्थ्यते तियत्नेन तद्ब्रह्मेत्यव
धारय ३४ टीका यतो वा इमानि भूतानीत्यादिवेदांतवाक्येषु मुमुक्षुभिः इति यत्नेन युक्तिचार्यत्वेन समर्थ्यते
तद्ब्रह्म विचारयितव्यमिति तद्ब्रह्मेत्यवधारयः यज्जगत्कारणं ब्रह्म तद्विचारयितव्यमिति तटस्थलक्षणकथ
नार्थत्वेनापि कार्यकारणत्वोक्तेः प्रयोजनमुक्तमिति द्रष्टव्यं ३४ यद्यपि कार्यं हि दृश्यत्वादिहेतुनाऽधिष्ठा
नज्ञानापनोद्यत्वेन चात्र प्रपंचस्यासत्त्वे सति विजातीयभेदो ब्रह्मणि निरस्तः तथापि जीवानां प्रपंचविल

आत्मभेदः अदृश्यः आत्मधर्मत्वात् दृग्बोधवत्

बा.व. त्मत्वेन सजातीयत्वे सति तद्भेदनिरासः कथमित्यत आह जीवात्मना प्रवेशश्च नियंतृत्वं च तान्प्रति श्रूयते ध्रु

१३ स्य वेद्यतद्भुस्तत्त्वयथा रय २४ टीका तत्सृष्ट्वा तदेवानुप्राविशत् इत्यादिवेदांतेषु ब्रह्मण एव जीवरूपेण कार्य

कारणानुप्रवेशः श्रूयते ततः उपाधिभेदात् कल्पितभेदमंतरेण स्वाभाविकभेदाभावात् सजातीयभेदो नास्तीति भावः

आत्मनः स्वाभाविकभेदोऽस्तीति वदन्वादी देवानांप्रियः प्रष्टव्यः आत्मभेदः किं दृश्यः अदृश्यो वा आद्ये किमात्म

न॰५ नादृश्यः अन्येन वा अन्यस्याचेतनत्वेन दृष्टृत्वानुपपत्तेः आत्मनेति वक्तव्यं तथा च सत्यात्मदृश्यस्य चेतयितृत्वादेः आ

त्मधर्मत्वमंतरेण तद्दृश्यभूतघटादिधर्मत्ववदात्मदृश्यस्य भेदस्यात्मदृश्यभूतदेहादिधर्मत्वं वक्तव्यं नादृ

द॰७ श्यात्मधर्मत्वं अदृश्यः। अयधर्मस्तु दृग्बोधवदृश्य एव स्यात् न दृश्यः द्वितीयस्य साध्यविकलत्वात् स्वीकरणादृग्

ग्बोधस्यापि दृश्यत्वांगीकारे द्रष्टुः द्रष्टृत्वमेव न स्यात् इदं तु समर्थमेव न शक्यते न ह्येकस्य दृश्यत्वं द्रष्टृत्वं च

संभवति वस्तुनो द्वैरूप्यासंभवात् तस्मान्नाद्यः तर्ह्यात्मभेदस्त्वदृश्य इति चेत् ब्रूमः अस्मत्सरणावसि आत्म

भेदस्यादृश्यत्वे स एव नास्तीत्युक्तं भवति ननु परं द्रष्टृभेदो विद्यते तथा न प्रतीयत इति चेन्न तत्सद्भावे प्रमाणाभा

वादात्माभेद एव सत्यः स्यात् तस्मान्न द्वितीयः किं चात्मभेदः किमात्मनोऽभिन्नोऽभिन्नो वा अभिन्नश्चेत् आत्मस्वरूपव्यति न॰

रेकेण पृथग्रूपेणासंभवात् आत्मन एकत्वमेव स्यात् नानेकत्वं भेदात्स्व आत्मस्वरूपाद्भिन्न इति चेत् तर्हि तद्भिन्नः

रक्तत्वादिवदन्यधर्म एव स्यात् न तद्द्रष्टृभूतात्मधर्मत्वं तस्मादात्मनि भेदगंधोऽपि नास्त्येव तथापि निरवयव दी

स्य निर्विकारस्य निर्मलस्याकाशस्यैकत्वेऽपि घटमठाद्युपाधिभेदेन यथा घटाकाशो मठाकाशो महाकाश इत्या

दिभेदभ्रांतिः स्यादेव मुपाधिभेदात् जीव ईश्वर इत्यादिभ्रांतिव्यवहारोऽप्यवती त्यलं विस्तरेण न च तर्ह्यात्मनः ए

कत्वे दाडिमादिफलवत्स्वांतर्गतभेदः स्यादिति वाच्यं स यथा सैंधवघनोऽनंतरो बाह्यः कृत्स्नो रसघन एवैवं। १३

वाभ्यरे अयमात्मानंतरोबाह्यः कृत्स्नप्रज्ञानघन एव एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किंचन इति श्रुत्या सैंधवघन
शर्करखंडादिवदेकरसत्वप्रतिपादनान्निरवयवत्वाच्च स्वगतनानात्वं आत्मनो नास्तीत्यर्थः ननु तर्हि ब्रह्मण ए
वकार्यकारणानुप्रवेशाज्जीवरूपेणावस्थानेन तत्तादात्म्याद्बंधत्वं स्यादित्याशंक्य कार्यकारणोपाधिसंहतस्या
शावस्प्रतीयमानस्य जीवस्यैवाविद्यातो बंधो भवति नासंहतस्य ब्रह्मस्य तस्य भीषास्माद्वातः पवत इत्यादिना जी
वनियंतृत्वश्रवणात् द्वितीयमित्रेत्याह नियंतृत्वं चेति अयमाशयः यथा शरावादि प्रतिबिंबितस्य सूर्यस्य व्योमस्थस्य
चभेदाभावेपि प्रतिबिंबगत चलनादिकं बिंबे नायाति एवं बुद्धिस्थचिदाभासरूपजीवगतरागद्वेषसुखदुःखा
त्मकबंधनं बिंबभूते ब्रह्मणि नायाति एवं शरावादिप्रतिबिंबितेषु सूर्यबिंबेषु मध्ये एकस्य चलनं अन्यस्या
यानं संभवति तद्वज्जीवानामप्येकस्य बंधनमन्यस्य नायातीति किंच बुद्धिस्थचिदाभासस्यापि रागद्वेषसुखदुः
खात्मकबंधनं स्वाभाविकं न भवति किंतु तप्तायःपिंडदग्धृत्वारोपवत् बुद्धिगतमेव रागद्वेषादिकमविकारि चि
दाभासे ध्यारोप्यते तथा सति केवलात्मनो नास्तीत्यत्र किमु वक्तव्यं न च निरूपस्यात्मनः कथं प्रतिबिंबभावइ
प्या ४ तिवाच्यं निरूपस्याकाशस्य साभ्रनक्षत्रस्य जले प्रतिबिंबभावदर्शनादिति अथवा ब्रह्मण एव जीवत्वे स्वस्य
स्वनियंतृत्वमनुपपन्नं अतः कोजीवनियंतेत्याकांक्षायां सर्वज्ञत्वपरेशत्वादिलक्षणरहितस्य जीवस्य नियं
तृत्वानुपपत्तेः ब्रह्मण एव व्याप्याधिभेदान्नियंतृत्वमुपपद्यत इत्याह नियंतृत्वं चेति ३५ अत एव मतो जीवत्वं पुण्यापुण्य
मिश्रकर्मणः फलदातृत्वमपि तस्यैवेति श्रुतिषु श्रूयत इत्याह कर्मणां फलदातृत्वं यस्मै वश्रूयते श्रुतौ जीवा
नां हेतुकर्तृत्वं तद्ब्रह्मत्वव्याख्य ३६ टीका फलमत उपपत्तेरित्यस्मिन्नधिकरणे कर्मण एव च फलदातृत्वं वाक

वा.वृ. मिणाराधितस्य परमेश्वरस्यैवेति संशयः अपूर्वद्वारा कर्मणः फलदातृत्वमिति पूर्वपक्षं कृत्वा अचेतनत्वाद एव
१४ स्य फलदातृत्वानुपपत्तेः कर्मणाराधितस्य परमेश्वरस्य कालांतरदेहांतरदेशांतरभाविफलदातृत्वोपपत्तेः ।
14 अपूर्वकल्पनं मुधेति राद्धांतितं एवमेतदधिकरणे तद्विषयवाक्ये चैतेषामहं समुद्धर्ता तानहं द्विषतः क्रूरान्संसा
रिष्वेतो वचः परमेश्वरस्य फलदातृत्वं श्रूयते तद्ब्रह्मेत्यवधार्यते त्वर्थः नकेवलं जीवानां कर्मफलदातृत्वं ब्रह्म
णः किंतु कारयितृत्वं चेत्यस्येत्याह जीवानां हेतुकर्तृत्वमिति हेतुकर्तृत्वं कारयितृत्वमेष ह्येव साधु कर्म का
रयति तं यमेभ्यो लोकेभ्य उन्निनीषते एष ह्येवासाधु कर्म कारयति तं यमेभ्यो लोकेभ्योऽधो निनीषत उन्नेतुमिच्छ
ति अधो निनीषते अधोनेतुमिच्छतीत्यादिश्रुत्या कारयितृत्वं श्रूयते तद्ब्रह्मेत्यर्थः ननु उपाधिभेदात्कारयि
तृत्वे सत्यपि ब्रह्मणः स्वांशजीवविषये उन्निनीषाधोनिनीषा च कथमुपपद्यत इत्याशंक्याह यथापि तु राज्ञा
मनुवर्तमाने तामनुल्लंघ्य वर्तमानेपि पुत्रे पुत्रत्वे समाने सत्यपि तयोर्यथाव्यवहारं एकप्रीतिर्द्वेषश्च भवति तथात्रापि
परमेश्वरस्य स्वाज्ञारूपश्रुतिस्मृत्युक्तमार्गं अनुवर्तति द्वेषवति च जीवे यथाव्यवहारं एकप्रीतिर्द्वेषश्च भवति ततस्तत्प्री सं
तिद्वेषफला जीवविषये उन्निनीषा अधोनिनीषा च ब्रह्मणः उपपद्यत इति वेदितव्यं एवं मायोपाधिकब्रह्मणः
सर्वज्ञत्वपरेशत्वादिलक्षणकथनेन निर्विकल्पकब्रह्मणः परमेश्वरस्य च औपाधिकभेदो विद्यत इति गम्य
ते किंच एतद्रूपवर्णनद्वारा विशेष्यलक्षणेन निर्विकल्पकब्रह्मतादात्म्यज्ञानात् जीवस्यापि ब्रह्मत्वे
सर्वज्ञत्वादिलक्षणत्वं स्यादिति सर्वं चिंतितं ३६ इदानीं उभयपदार्थप्रतिपादकवाक्यश्रवणबलात् तत्त्वंपदार्थौ वि
तर्क्य तत्र संशयादिराहित्यमवाप्य तत्त्वमस्यादिवाक्यार्थं चिंतयेदित्यमुमर्थं ज्ञापयन्नाह तत्त्वंपदार्थौ निर्णीतौ वाक्या १४

कृप ४

र्थस्थितयतेऽधुना तादात्म्यमत्र वाक्यार्थस्तत्पदयोरेव पदार्थयोः ३१ टीका विशेषणविशेष्यसंसर्गविशिष्टतादात्म्येषु
वाक्यार्थेषु मध्ये निश्चितार्थमाह तादात्म्यमत्रेति अत्र वाक्ये तादात्म्यमेवेति निश्चितं ३१ कृतश्लोकग्राह संसर्गो
वा विशिष्टो वा वाक्यार्थो नात्र संमतः अखंडैकरसत्वेन वाक्यार्थो विदुषां मतः ३२ टीका अत्र अस्मिन्वाक्यवृत्ति
ग्रंथे तत्त्वमस्यादिवाक्ये च नीलोत्पलमिति वाक्य इव मुख्यार्थस्वीकरणे विशेषणविशेष्यसंसर्गवाक्यार्थो अ
न्यतरविशिष्टान्यतरस्वरूपविशिष्टवाक्यार्थो वा न संमतः इष्टो न भवतीति तत्र तु नीलपदार्थनीलगुणस्योत्प
लपदार्थोत्पलद्रव्यस्य च शुक्लपटादिव्यावर्तकतया अन्योन्यविशेषणविशेष्यभावसंसर्गार्थस्य वा अन्यतरवि
शिष्टान्यतरस्वरूपविशिष्टार्थस्य वाक्यार्थत्वांगीकारे प्रमाणान्तराविरोधान्मुख्यार्थयोरेव वाक्यार्थत्वं सं
गच्छत एव तत्त्वमस्यादौ तु उभयोः अत्र तु तदर्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वमर्थापरोक्षत्वादिविशिष्टचैत
न्यस्य च अन्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावसंसर्गस्य वा विशिष्टैकस्य वा वाक्यार्थत्वांगीकारे प्रत्य
क्षादिप्रमाणविरोधाद्वाक्यार्थयोरैक्यं न संगच्छत इति तदुभयं न संमतमित्यर्थः एवमनेनैव देहेनाहं ब्रह्मा
स्मीति प्रतिपत्तिवाक्यपि वा ययोरहं ब्रह्मार्थयोरन्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावसंसर्गवा
क्यार्थो न संगतः विरुद्धत्वात् किंच अस्मिन्ः सर्वगतत्वात्तदंशस्य जीवस्य तदंतर्भूतत्वादपरोक्षत्वं किंचिज्ज्ञ
त्वादिपुरुषो अहं परोक्षत्वसर्वज्ञत्वादियुक्तं ब्रह्मास्मीति ब्रवीतः पातित्वेन भावनायाः ब्रह्मविशिष्टजीवस्य
विशिष्टैकस्य स्वरूपं स्वमपि त्वं सर्वत्र स्थितो यस्मादहं पूर्णत्वपि स्थितस्तीर्थवदौपचारिकमेवस्यात् अतो विशि
ष्टलक्षणवाक्यार्थांगीकारेपि तत्त्वपदार्थयोर्भेद एव प्रतीयते नैकत्वं कथमिति चेत् यथा तटाकस्य महाजलमध्ये
पातितो घटस्यापि जलस्य तटाकजलांतर्भूतत्वेन तद्विशिष्टत्वेपि तटाकस्य जलघटस्यत्वाद्याकारेण भेद एव।

कृ॰ ५२

वा॰ वृ॰ प्रतीयते नैकत्वं तद्वदित्यर्थः संसर्गो विशिष्टयोः कोऽभेद इति चेत् यदा नीलमुत्पलमित्युक्ते उत्पलद्रव्यं श्वेतपीता
१५ दिभ्यो व्यावर्तयति नीलपदं व्यावर्तकत्वात् विशेषणं विशेषणत्वेन संसृज्यते विशेष्येण उत्पलेन सह तदा नीलगु
15 णमपि वस्त्रादिभ्यो व्यावर्तयन् उत्पलपदं विशेष्यं नीलपदेन सह विशेषणत्वेन संसृज्यते तदा विशेषणवि
शेष्यभाव संसर्गे अन्योन्यव्यावृत्तिमनपेक्ष्य संसृष्टपदार्थप्राधान्येन नीलविशिष्टं उत्पलं दण्डविशिष्टो देवद
त्त इति वदन्यतरविशिष्टान्यतरार्थस्वीकारः तदा विशिष्टार्थ इति विपक्षानुगुण्येन संसर्गविशिष्टवाक्यार्थयो।
म॰ दे भेदः तदुभयमत्र विरुद्धत्वान्न संमतं रस्तुके किं च तदपि स्वीकारे भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः क्षीयन्ते चा
स्य कर्माणि तस्मिन् दृष्टे परावरे स चापमात्मा ब्रह्म वेद ब्रह्मैव भवतीत्यादि श्रुतयो नोपपद्येरन् तस्माद्द्वौ विदुषा
न संमतौ किन्तु विरुद्धांशपरित्यागपुरःसरं अविरुद्धवस्तुतादात्म्यरूपवाक्यार्थः संमत इत्याह अखण्डैकरसत्वेनेति
अखण्डैकरसत्वं नाम अहमेव ब्रह्मास्मि ब्रह्मैवाहमस्मीति व्यवहारपुरःसरमखण्डैकरसवस्तुत्वप्रतिपत्तिः अत्र
श्रुतिः त्वं वाहमस्मि भगवो देवते अहं वै त्वमसीति वा अखण्डरूपमेव वाक्यार्थं केवलोपनिषदि स्त्वमात् स्त्वमतरेणा
ति तत्त्वमेव त्वमेव तत् इति श्रूयते अहं त्वं त्वमहं देव इति क्वाप्यभेदोक्तिर्नावयोः दिदृक्षा मत्तो प्रयातोऽसि दिदृक्षात्वत्ता
महं गतः युष्मदस्मदनेतायपरं तुभ्यं शिवात्मने नमो देवादिदेवाय पराय परमात्मने इति वाशिष्ठप्रह्लादव
चनं पदयोः समानाधिकरण्यं पदार्थयोर्विशेषणविशेष्यभावः प्रत्यगात्मपदार्थयोर्लक्ष्यलक्षणभावः [illegible]
इति संबन्धत्रयेण अखण्डार्थो बोधनीयः किमिति विशेषणविशेष्यभावो निषिध्यत इति न शंकनीयं परं परया अख
ण्डार्थावकारकत्वेनांगीकारात् कथं सामानाधिकरण्यविशेषणविशेष्याभ्यामेकत्वे प्रतिपादिते सति अस्मिन्नर्थे
अनुपपत्तिं दृष्ट्वा पश्चाद्विरुद्धांशत्यागेनोभयत्रानुगताविरुद्धांश चैतन्यमात्रांगीकारेण अखण्डैकरसवाक्यार्थस्वी १५

कारणत्वं संसर्गस्योपकारकत्वेन न च तद्धिदं ब्रह्मास्मि ब्रह्मैवाहमस्मीत्यखंडार्थे संगीकृते प्यहं शब्दार्थत्वेन ब्रह्म
शब्दार्थत्वेन च पुरुषस्य प्रतिभेदः प्रतीयत इति मंतव्यं शिरोव्यतिरेकेण राहोरभावेपि राहोः शिरः इत्यत्र षष्ठ्यास्व
स्वामिभावसंबंधप्रतीतिर्यथा पृथगभेदः प्रतीयते घटः कलशः कुंभ इत्यत्र अर्थतो भेदाभावेपि शब्दतः पृथग्भेदः
प्रतीयते तथात्रापि अर्थतो भेदाभावेपि शब्दमात्रेण भेदो विभ्रम इति संतोष्टव्यं विद्वद्भिरिदं चेनोपक्रमोपसंहारादि
भिः षड्विधतात्पर्यलिंगैर्वेदांतानां सजातीयविजातीयस्वगतभेदराहित्यमात्रपरत्वं ज्ञात्वा यद्दृश्यावलोकनं म
तरेण स्वानुभवमात्रनिष्ठा भवंतीति त एवाखंडार्थे तेषामखंडार्थ एव संमतः नान्यस्तेषां अथवा संसर्गो वेति श्लोक
म४ स्यैवार्थः ननु वर्णानां समूहः पदमिति पदलक्षणं आकांक्षायोग्यतासन्निधिमतां पदानां समूहो वाक्यमिति
वाक्यलक्षणं तथा च सत्यभिहितान्वयवादिनां वेदांतिनां मते देवदत्त गामानय शुक्लां दंडेन इत्यत्र संजातइत्यादि
वाक्यवत्तत्त्वमसि अहं ब्रह्मास्मि अयमात्मा ब्रह्मेति महावाक्येष्वपि स्वस्ववाचकपदैरभिहितानां पदार्थानां अ
न्योन्याकांक्षायोग्यत्वेन संसर्गो वा वाक्यार्थो वर्णनीयः अतः कथं तादात्म्यमत्र वाक्यार्थ इत्युक्तमिति चाशं
क्य तत्त्वमस्यादिपदानामखंडैकरसे चैतन्ये पर्यवसायित्वे पदार्थभेदाभावात् अत्र संसर्गो वाक्यार्थो न संभवति।
संसर्गस्य पदार्थनिष्ठत्वात् अतोन्यत्र वाक्यांतरे पदार्थबाहुल्यसंभवात्संसर्गः संभवति अत्र त्वेकार्थपर्यवसाना
त्तादात्म्यमेव वाक्यार्थः संमतो विदुषां नान्य इत्यभिप्रायेणांतरमाह संसर्गो वेति श्लोकेन अथवा तार्किकव्याजेनस्य
कार्थः स्पष्टीकृतः न च पदार्थानां संसर्गस्य वाक्यार्थत्वात् पदार्थभेदाभावेन वाक्यार्थ एव न स्यादिति शंक
नीयं किं विशिष्टत्वसर्वज्ञत्वादिलक्षणो वाक्यार्थोपेक्ष्यः तथा कल्पितभेदोपपत्तेः तस्मादुक्तासंसर्गे प्रतीयमानेपि
विरुद्धांशपरित्यागेन उभयानुगतचैतन्यमात्रपर्यवसानात् परमार्थतस्तादात्म्यमेव वाक्यार्थस्तथैव विशि

वा॰वृ॰ कार्योपि न संभवति पदयोर्भेदाभावात् दंडी देवदत्तः शुक्लः पट इत्यादौ दंडी देवदत्त इति पदयोर्भेदस्य विद्यमानत्वात्
१६ तदन्यतरविशिष्टान्यतरार्थ स्वरूपविशिष्टवाक्यार्थः संभवति किंतु तादात्म्यमेव वाक्यार्थ इत्यभिप्रायः एकमे
1b वाद्वितीयं ब्रह्म नेह नानास्ति किंचन मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति यदा ह्येवैष एतस्मिन्नुदरमंत
रं कुरुते अथ तस्य भयं भवति तत्र को मोहः कः शोक एकत्वमनुपश्यतः आत्मैवेदं सर्वं शिवमद्वैतं चतुर्थं मन्यं
ते द्वितीयाद्वै भयं भवति एक एव हि भूतात्मा भूते भूते व्यवस्थितः एको देवः सर्वभूतेषु गूढः सर्वस्य नेता प्रभुतपस्त्व
खंडैकरसवाक्यार्थ एव उपपद्येरन् ततः इदमेव विदुषां संमतं ३८ इदानीं विद्वत्संमतत्वेनोक्तमर्थमेव स्फुटीक
रोति प्रत्यग्बोधो य आभाति सोऽद्वयानंदलक्षणः अद्वयानंदरूपश्च प्रत्यग्बोधैकलक्षणः ३९ टीका अंतःकर
णावच्छिन्नत्वेन प्रत्यक्त्वं प्राप्तो यो बोधः स त्वंपदलक्ष्यत्वेनाभाति स्वयं प्रकाशते सोऽद्वयानंदलक्षणः अद्वयानं
दस्वरूपः तथाद्वयानंदरूपश्च तत्पदलक्ष्यत्वेन स्वयं प्रकाशमानोऽद्वयानंदरूपः आत्मा च प्रत्यग्बोधैक
लक्षणः प्रत्यग्बोधेन एकमभिन्नं लक्षणं स्वरूपं यस्य स तथोक्तः ननु आनंदबोधयोः कथं तादात्म्यमुपप
द्यत इति चेन्न विरोधः आत्मनो बोधानंदरूपत्वात् अस्तु तर्हि अद्वयानंदबोधरूपः प्रत्यगानंदबोध इति किमिति
नोच्यत इति चेत्तत्रायमभिप्रायः बोधानंदस्वरूपः आत्मांतःकरणावच्छिन्नः सन् द्वितीयत्वे सति दुःखभया स५५
द्याक्रांतता आनंदस्फुरणाभावे बोधरूपेण च तिष्ठते अनवच्छिन्नः आत्मा अद्वितीयत्वेन दुःखभयाद्यभावा
त् द्वैतांतराभावेन बोधस्फुरणाभावे सत्यानंदरूपेण वतिष्ठते इति अतः उभयोरेकरूपत्वात् अत्यंतैक्येन
कापि दनुपपत्तिः संसर्गविशिष्टपक्षे प्रत्यक्षविरोधात् वाच्ययोरैक्यमौपचारिकमेव स्यात् तच्च श्रुतिविरुद्ध
मित्युक्तं ३९ एवं लक्ष्यार्थयो रत्यंतैक्यरूपवाक्यार्थज्ञाने सति किं स्यादित्यत आह इत्थमन्योन्यतादात्म्य १६

प्रतिपत्तिरिदमेवत अब्रह्मत्वं त्वमर्थस्य व्यावर्तेत तत्त्वहि ४० टीका अन्योन्यतादात्म्यं परस्परं तादात्म्यं द्व
योरप्यिस एवात्मा तदात्मा तत्पदार्थस्य परमात्मा स्वरूपं स एव त्वंपदार्थस्य च आत्मा स्वरूपं स एव तत्पदा
र्थस्य तयोर्भावस्तादात्म्यं तस्य प्रतिपत्तिः ज्ञानं तत् यद्यमेवं तदैव अब्रह्मत्वमहं मनुष्यः स इति प्रत्ये
त्व ४० नकर्तृत्वभोक्तृत्वादिलक्षणं संसारित्वं त्वमर्थस्य प्रत्यगात्मनो व्यावर्तेत हि शब्दो हेत्वर्थे ४० ब्रह्मत्वं तु स्वस्य स्वयं
परोक्षत्वं न भवति किं त्वं ब्रह्मस्वविशिष्टस्य प्रत्यगात्मन एवेति यतः अतस्तस्याब्रह्मत्वव्यावृत्तौ ब्रह्मणः पारोक्ष्यमपि
व्यावर्तेतेत्याह तदर्थस्य च पारोक्ष्यं यद्येवं किं ततः शृणु पूर्णानन्दैकरूपेण प्रत्यग्बोधोऽवतिष्ठते ४१ टीका
यद्येवमिति तत्त्वमर्थयोरेकत्वज्ञानात् तदज्ञानसंभूतपारोक्ष्याब्रह्मत्वयोः व्यावृत्तिः स्यादित्यर्थः किं
ततः इति ततः परं किंरूपेण अवतिष्ठत इति शिष्यप्रश्नः पारोक्ष्याब्रह्मत्वव्यावृत्त्यनन्तरं पूर्णत्वं प्रत्यक्त्वं
चोभयमपि व्यावर्तेत वा न वेति प्रश्नाभिप्रायः आचार्यस्तु शिष्याभिप्रायं ज्ञात्वोत्तरं वक्तुमाह शृणु इति स्व
भावत एव पूर्णस्यात्मनः स्वाविद्ययैव प्रत्यक्त्वं अतः स्वविद्यया प्रत्यक्त्वस्यैव व्यावृत्तिः न पूर्णत्वस्येत्याह पू
र्णानन्दैकरूपेणेति पूर्णानन्देन एकमभिन्नरूपं यस्य स तथा ततः प्रत्यग्बोध एव प्रत्यक्त्वव्यावृत्तौ पूर्णानन्द
त्वेनावतिष्ठत इत्यर्थः ४१ एवं स्वकीयग्रन्थस्य तत्त्वमर्थयोरेकत्वलक्षणो वाक्यार्थो निर्णीतः इदानीं तत्त्वमस्या
वाक्यं ४२ दि कथं प्रवर्तत इत्याकाङ्क्षायामेवमस्मदुक्तप्रकारेण प्रवर्तत इत्याह तत्त्वमस्यादिवाक्यं च तादात्म्यप्रतिपादने
लक्ष्यौ तत्त्वंपदार्थौ द्वावुपादाय प्रवर्तते ४२ तत्त्वमस्यादिवाक्यमपि तादात्म्यप्रतिपादने तादात्म्यप्रतिपादना
र्थं लक्ष्यौ लक्षणाविषयौ द्वौ तत्त्वंपदार्थौ अद्वयानन्दप्रत्यग्बोधौ उपादाय ऐक्ययोग्यत्वेन स्वीकृत्य प्रवर्तते

बा॰बो॰ उभयोरेकत्वलक्षणवाक्यार्थं प्रतिपादयति लक्ष्यौ उपादाय तेन न पदे । द्वय प्रत्यक्त्वविशिष्टौ वैकल्यान्हौ वाच्यार्थौ
२७ लक्षितलक्षणया भवतः ४२ तत्त्वमस्यादिवाक्यस्य वाच्यार्थपरित्यागेन प्रवर्त्तमानेत्वं प्रसङ्ग्य बाधोयमाभातीत्यादि ।
श्लोकेन स्फुटीकृतमित्याह हित्वाद्वौ शबलौ वाच्यौ वाक्यं वाक्यार्थबोधने यथा प्रवर्त्तते स्माभिस्तथा व्याख्यात
मादरात् ४३ टीका [illegible] तत्त्वमस्यादिवाक्यं प्राक्लोविशिष्टे । अतएव वाच्यौ वाग्विषयौ हित्वा परित्यज्य वा
क्यार्थबोधने यथा प्रवर्त्तते तथास्माभिर्व्याख्यातमित्यनेन व्याख्याययोरेकरूपत्वेनान्योन्यविरोधाभावात्
असमस्तमिलितार्थयो विद्वद्भिर्नोपेक्षणीय इत्यर्थो दुर्लभं भवति आदरात् एवं व्याकृते एतद्व्याकृतं मुमुक्षुणा
निःसंशयं स्वरूपसाक्षात्कारेण विद्यातीति तात्पर्यं न तु [illegible]त्वेन ४३ एवं वाच्यार्थं परित्यज्य लक्ष्योपाद
नेन वाक्यं प्रवर्त्तत इत्युक्तमिदमनुपपन्नं शब्दस्य वाच्यार्थ एवमुख्यार्थः वाक्यस्य पदयोः मुख्यार्थपरि
ग्रहे विरोधे सति लक्ष्यार्थोपादानमुक्तं तत्र को विरोध इत्याशंकायां दर्शयित्वा लक्षणावृत्तिं च कृतत्वंपद विरोधं ४८
वाच्यमुख्यार्थं संक्षेपतो दर्शयति आलंबनतया भाति योस्मत्प्रत्ययशब्दयोः अंतःकरणसंभिन्नबोधः त्वंप स॰ ७
दाभिधः ४४ टीका योंतःकरणसंभिन्नो बोधोस्मत्प्रत्ययशब्दयोरालंबनतया भाति स त्वंपदाभिध इत्यन्वयः ।
आलंबनतया विषयतया अंतःकरणसंभिन्नबोधः अंतःकरणावच्छिन्नबोधः त्वंपदेनाभिधीयत इति त्वं
पदाभिधः त्वंपदवाच्यो जीव इत्यर्थः एतेनांतःकरणावच्छिन्नत्वं त्वंपदवाच्यत्वेन च प्रत्यक्त्वं सहितीय
त्वंचोक्तं परोक्षत्वपरोक्षत्वप्रदर्शनार्थं तत्पदवाच्यार्थमाह मायोपाधिर्जगद्योनिः सर्वज्ञत्वादिलक्षणः पा
रोक्ष्यशबलः सत्याद्यात्मकस्तत्पदाभिधः ४५ टीका मायोपाधिर्मलाश्रयविषयदर्पणवत् समष्ट्यज्ञानाश्र
यविषयत्वेन मायोपहितः आरतः अविद्याकल्पितजीवाभोगवत्त्वेनावृतादृष्यानंद इति यावत् अतो जगद्यो २७

निर्जगद्धितोपाधिकानां विशेषांशाव्यक्तिपुरस्सरं जन्मादेः सर्वाधिष्ठानत्वदर्शनात् सर्वज्ञत्वादिल
क्षण इति अतएव निमित्तकारणं च स एव सूत्रे यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तप इत्यादिश्रुतेः पारोक्ष्यशब
लत्वाच्छन्नत्वात् जीवापेक्षया परोक्षत्वादिविशिष्टः सत्यकामः अपरिच्छिन्नज्ञानानंदस्वरूपः एवमुक्तल
क्षणो यः स तत्पदाभिधेयः तत्पदवाच्य ईश्वरः तस्य मायोपाधिकत्वात् परोक्षता जगदधिष्ठानत्वेन पूर्णता ४५
एवं वाच्यार्थमभिधाय तयोरभेदप्रतिपादने विरोधं दर्शयन् लक्षणावृत्तिमाह प्रत्यक्परोक्षते कस्य सद्वि
तीयत्वपूर्णता विरुध्येते यतस्तस्मात् लक्षणा संप्रवर्तते ४६ टीका वाच्ययोरेवाभेदे प्रतिपाद्यमाने एकस्यै
व प्रत्यक्त्वं पारोक्ष्यं च सद्वितीयत्वं पूर्णत्वं च विरुध्येत इति यतः अतः लक्षणा संप्रवर्तते इत्यन्वयः विरुध्येत
इत्यत्र मायोपाधिकत्वकार्योपाधिकत्वकिंचिज्ज्ञत्वसर्वज्ञत्वादिविरोधो विद्यत इत्यर्थः ४७ अस्मिन्वाक्येपि १५८
लक्षणा भवतीति वक्तुं लक्षणासामान्यलक्षणमाह मानांतरविरोधे तु मुख्यार्थस्य परिग्रहे मुख्यार्थेना
विनाभूते प्रतीतिर्लक्षणोच्यते ४८ टीका मुख्यार्थस्य वाच्यार्थपरिग्रहे प्रत्यक्षादिप्रमाणविरोधे सति मु
ख्यार्थेनाविनाभूते अर्थांतरे प्रतीतिर्लक्षणा उच्यते अस्मिन्वाक्ये इयं लक्षणा संभवतीति अत्र प्रतीतिहे
तुभूतशब्दप्रवृत्तिरर्थो लक्ष्यते सा च त्रिधा जहल्लक्षणा अजहल्लक्षणा जहदजहल्लक्षणा चेति तासु गं
गायां घोषोस्तीत्यस्मिन्वाक्ये गंगायां घोषवासानुपपत्तेः गंगाशब्दस्य मुख्यार्थं प्रवाहं परित्यज्य तदवि
नाभूते अर्थांतरे तीरे वर्तमानता जहल्लक्षणा एवं मनो ब्रह्मेत्यस्मिन्वाक्ये इयपत्वेनाचेतनस्य मनसश्चै
तन्यरूपब्रह्मत्वानुपपत्तेः मनःशब्दस्य मुख्यार्थं धीवृत्तिमात्रत्वं परित्यज्य तत्साक्षिचैतन्ये अर्थांतरे
वर्तमानता जहल्लक्षणा श्वेतो धावतीत्यत्र केवलश्वेतगुणमात्रस्य धावनानुपपत्तेः श्वेतशब्दस्य मुख्यार्थं

वा.व. श्वेतगुणत्वमपरित्यज्य तदाश्रयपटे ते ॥ अर्थात् ॥ अश्वः श्वेतो धावतीति श्वेतगुणादस्य वर्त्तमानता ॥ अजहल्ल-
१८ क्षणा एवं सत्यं ज्ञानमनंतं ब्रह्म ॥ आनंदो ब्रह्मेत्युक्ते लोके ज्ञानानंदादीनां धर्मत्वेन प्रसिद्धत्वात्तेषां ब्रह्मत्वा-
18 नुपपत्तौ सत्यां विषयज्ञानादीनां गुणत्वेन ब्रह्मत्वानुपपत्तावपि निर्विषयज्ञानानंदादेरात्मस्वरूपत्वेन
गुणत्वाभावात् सत्यज्ञानानंदादिशब्दस्य मुख्यार्थमपरित्यज्य तत्स्वरूपत्वेऽपि तदाश्रयवत् प्रतीय-
माने ब्रह्मवस्तुनि सत्यज्ञानानंदस्वरूपं वस्तु ब्रह्मेति तत्र सत्यज्ञानानंदादिशब्दस्य वर्त्तमानता अजह-
ल्लक्षणा सोऽयं देवदत्त इत्युक्ते तत्कालतद्देशविशिष्टस्य एतत्कालएतद्देशविशिष्टस्य देवदत्तस्य चोभयो-
रेकत्वानुपपत्तौ तद्देशतत्काल एतद्देशएतत्कालवैशिष्ट्यांशं परित्यज्य उभयत्रानुगतदेवदत्तमात्रे शेषि-
तस्य वर्त्तमानता भागलक्षणा सैव जहदजहल्लक्षणेत्युच्यते एवं सति तत्त्वमस्यादिवाक्येषु का लक्षणे-
त्यत आह तत्त्वमस्यादिवाक्येषु लक्षणा भागलक्षणा सोऽयमित्यादिवाक्यस्थपदयोरिव नापरा ४८ टीका सो-
ऽयं देवदत्त इत्यस्मिन्वाक्ये सोऽयंशब्दयो मुख्यार्थपरिग्रहे तद्देशतत्कालविशिष्टस्य एतद्देश एतत्कालविशि-
ष्टत्वाभावात् मुख्यार्थयोरेकत्वासंभवे सति सोऽयंपदे उभयत्र वैशिष्ट्यांशं त्यक्त्वा यथा देवदत्तमात्रे वर्त्तेते तथा
तत्त्वमसीतिवाक्येऽपि तत्त्वंपदयोर्मुख्यार्थपरिग्रहे परोक्षत्वस्य प्रत्यक्त्वाभावात् ॥ अपरिच्छिन्नत्वेन पूर्णस्याद्वि-
तीयत्वाभावाच्च वाच्यार्थयोरेकत्वासंभवे सति तत्त्वंपदे उभयत्र परोक्षत्वादिसद्वितीयत्वादिवैशिष्ट्यांशं
त्यक्त्वा कथं तत्पूर्णानंदे प्रत्यग्बोधे च वर्त्तेते ॥ ननु तथापि पूर्णानंदप्रत्यग्बोधयोः कथं तादात्म्यमिति चेत् अ-
सीति पदेन प्रत्यग्बोधस्यैव ब्रह्मरूपत्वेन पूर्णानंदत्वैकत्वे सति वक्ष्यमाणन्यायेन पूर्णानंदत्वे प्राप्ते प्र-
त्यक्त्वव्यावृत्तिः स्यात् बोधस्यैवानंदत्वे पूर्णत्वे तेनेत्यादयस्तथायोः प्राप्ता [illegible] तीति पश्य आरभ्यान्वावसरे एवं तत्त्व १८

वदयेत्लिंग लक्षणयैव तादात्म्यं स्वीकर्तव्यं लक्षणांतरेण तयोरसंभवात् केचिन्मायामोहितधियः प्रकारांतरेण वा
क्यार्थं कल्पयंति कथमिति चेत् त्वं तदसि तदंशोसि तद्विकारोसीति वा तत्त्वमसि मध्ये न योग्यं कथमिति चेत् तत्त्वम ।
सीति वाक्येन परस्यांशो जीव इति वा विकारस्तु इति वा नोच्यते तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुत्या अनेन जीवेनात्म
जीव ५४ ना प्रविश्येति स्मृत्या च स्वमायया स्वसृष्टे जगति परमात्मन एव बुद्ध्यवस्थितत्वात् यथा घटाकाशो महाकाशस्यां
वा ५५ शो वा विकारो न भवति एवमात्मनो निरवयवत्वेन निरंशत्वात् निर्विकारत्वात् नोभयं आदित्यो यूपो यजमा
नः प्रस्तर इतिवत् न प्रशंसापरं वाक्यं यूपादेरादित्यादिस्वरूपत्वासंभवात् प्रशंसापरत्वे अत्र तु लक्ष्यार्थयोर
संगतेर्विरोधाभावादनर्थवादत्वा अग्निर्हिमस्य भेषजमित्यादिवाक्यवन्न गौणार्थप्रतिपादकं आत्मनो निर्गुणत्वात् ना
पि त्वमर्थस्य परमात्मकार्यत्वप्रतिपादकं वाक्यं मद्भूत्वेवीजो वटस्तरुरिव तदात्मनो अनादित्वेन जन्मा [illegible]
[illegible] द्यभावात् कार्यत्वानुपपत्तेः नापि वाक्यस्य जातिव्यक्ति प्रतिपादकत्वं दीर्घोश्वः कृष्णोश्वः स्थूलो मनुष्यः
कृशो मनुष्य इतिवदात्मनः एकत्वेन व्यक्तिभेदाभावात् न च नीलोत्पलं शुक्लः पट इत्यादिवाक्यवत् गुणगुणिलक्ष
त्व प्रतिपादकं निर्गुणत्वादात्मनः नापि विशेष्य प्रतिपादकं आत्मस्वरूपस्य निर्विकल्पकज्ञानैकरसत्वात् हि किसा
नुपपत्तेः नाप्युपासनापरं वाक्यं वाचं धेनुमुपासीत आदित्यो ब्रह्मेत्युपासीतेत्यादिवाक्यवत् अन्यत्वे सति कार्यज्ञा
नार्थमेव तत्त्वमसीति न वक्तव्यो पदिष्टत्वादेतत् ज्ञानशेषत्वात्सर्वोपासनायाः एतत्सर्वं संसर्गविशिष्ट निराक
रणेनैव निराकृतप्रायं अथापि विस्पष्टार्थमनूद्य निरस्तमेव मात्मभेदाभावादखंडैकरसमेव वाक्यार्थ इति सिद्धं अ
तः सर्वेषां वेदांतानां यथासंभवं लक्षणया वृत्त्यैव ब्रह्मस्वरूपप्रतिपादकत्वं केचिदितरत्र अवस्था स्वरूप
र्यवसानं न गुणवृत्त्या आत्मनो निर्गुणत्वात् नापि मुख्यवृत्त्या स्वरूपप्रतिपादकत्वं यतो वाचो निवर्तंत इति ।

ग्र४१
वाक्यानां अजहल्लक्षणया वृत्तिः तत्त्वमस्यादिसदृशानां जहदजहल्लक्षणया प्रवृत्तिः अस्थूलमनण्वेवेत्यादिसदृशानां ४३
ए४२
वाक्यानां ४३

ब॰ वृ॰ वाच्यत्वनिषेधात् ननु तर्हि ब्रह्मैकविषयी वाच्यं वेदत्वं तत्र मास्तिके अन्यथा वाचो विमुंचथेत्यत्र ब्रह्मणो वाचिविषयत्वं
१९ कथं श्रूयत इति चेन्न विरोधः मुख्यवृत्तिगुणवृत्तिविषयत्वाभावविलक्षणवृत्तिविषयत्वमात्रपरत्वादतो म
19 नो ब्रह्मेत्यादिसदृशानां वाक्यानां जहल्लक्षणया प्रवृत्तिः सत्यं ज्ञानमनंतं ब्रह्मेत्यादिसदृशानां अतन्निरसनद्वा
रप्रवृत्तिः कर्मकांडोपासनाकांडयोर्ब्रह्मज्ञानार्थमंतःकरणशुद्धिहेतुभूतानुष्ठानप्रतिपादकत्वेन ब्रह्मपरत्वं
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यत इति स्मृतेः एवं यथासंभवं सर्वत्र योजनीयं न कुत्रापि मुख्यतो गुणतो
वा प्रवृत्तिः ब्रह्मणः सर्वाविषयत्वादिति सर्वं मवदातं शोधितमित्यर्थः ४८ पूर्वसूक्तिनैदैकरूपेण ज्ञानेन जीवस्यै
व ब्रह्मत्वं वाक्यार्थं प्रतिपाद्यते प्रतिपादितमर्थं तत्त्वमस्यादिवाक्यं च तादात्म्यप्रतिपादन इत्यादि मिश्रैर्भूयो
त्तत्त्वमस्यादिवाक्यस्याभ्यसने वार्थ इति स्फुटीकृत्य तदपरोक्षज्ञानाय तज्ज्ञानदार्ढ्याय चोपायमाह अहं ब्र
ह्मेति वाक्यार्थबोधो यावद्दृढीभवेत् शमादिसहितस्तावदभ्यसेच्छ्रवणादिकं ४९ टीका अहं ब्रह्मेति स्वस्य ब्र
ह्मापरोक्षज्ञानं यावत् यस्मिन् काले निःशेषसंभावना विपरीतभावनाराहित्यं यथा भवति तथा दृढीभवेत् दृढं
भवेत्तद्दार्ढ्यस्य दुर्लभत्वसूचनार्थं चेति प्रयोगः तावत्कालपर्यंतं शमादिसाधनयुक्तः सन्नावृत्तिरसकृदु
पदेशादित्यधिकरणन्यायेन पुनः पुनः श्रवणमनननिदिध्यासनाभ्यासं कुर्यादित्यर्थः ब्रह्मापरोक्षज्ञानदा
र्ढ्याय शमादिसाधनानुष्ठानेन सह असकृच्छ्रवणाद्यभ्यासस्य विधानादुक्तसाधनानुष्ठानपुरःसरं द्वित्रि
वारं श्रवणादिकरणस्य ब्रह्मापरोक्षज्ञान [illegible] हेतुत्वं अर्थाद्दुर्लभं भवति एतेन द्वित्रिवारं श्रवणादि
ना ब्रह्मापरोक्षज्ञाने समुत्पन्नेऽप्यतिदार्ढ्याभावात् बहुकालारोपितसंसारवासनावशेन पुनः पुनः चित्तविक्षे
पः संभवति अष्टांगयोगसद्वासनाभ्यासाभावाद्धेतोः मनोवासनायाः निःशेषनाशाभावाच्च ज्ञानदार्ढ्याय १९

मनोवासनायाः निःशेषनाशाय च बहुकृत श्रवणाभ्यासं चाष्टांगयोगसहासनाभ्यासं च कुर्यादित्युक्तं भवति ए
वं कृते विदेहमुक्तिता स्यात् अन्यथा शमादियुक्तस्यापि त्रिवारं श्रवणादिकरणे जनिता परोक्षज्ञानमात्रेण जी
वन्मुक्तिता स्यात् इत्यमन्योन्यतादात्म्यप्रतिपत्तिर्यदा भवेत् अब्रह्मत्वं त्वमर्थस्य व्यावर्त्तेत तदैव हि तत्पदस्य च पा
रोक्ष्यमित्यजा परोक्षज्ञानेन ब्रह्मत्वमित्थं ते: प्रतिपादितत्वात् इदमेव शंकातात्पर्येन समर्थ्यते ननु ब्रह्मापरोक्षज्ञा
नार्थं शमादिसाधनयुक्तस्य श्रवणादिकरणमुक्तं ततः परं किं प्रयोजनमिति चेत् न अहं ब्रह्मेत्यपरोक्षज्ञाने
समुत्पन्नेऽपि संसारवासनायाः निःशेषनाशो न स्यात् परोक्षज्ञानिनोऽपि संसारवासनानुवृत्तेः कुत्रचिद् दृष्टत्वा
त् संसारवासना दृढं बंधः इत्यभिधीयते वासनातीनवशं मोक्ष इत्यभिधीयते इति वशिष्ठेन निर्वासनस्यै
व विदेहमुक्त्यभिधानात् तस्मात् ज्ञानदार्ढ्याय निर्वासनत्वसिद्धये च श्रवणाभ्यासः कर्तव्य इति नन्वेता
वता वासनाक्लेशेन ब्रह्मापरोक्षज्ञानिनो जीवन्मुक्तस्य रागद्वेषात्मक संसारवासनासद्भावो नोपपद्यत इति
चेन्न अविद्याहीनस्य कोमलकंटकसदृशी सूर्वं यथा सम्यक्कृतोदन कार्यहतमतानास्ति एवं ब्रह्मापरोक्षज्ञान
दोर्ष्यादर्वाचीनकाले निःशेषसंसारनिदानत्वासंभवात् जीवन्मुक्तस्यापि दशाभेदेन संसारवासनासद्भा
वोपपत्तेः रागद्वेषभयादीनामनुकूलं चरन्नपि योंऽतर्व्योमवदत्यच्छः जीवन्मुक्त उच्यत इति वाशिष्ठे जीवन्मुक्तस्य स४५
संसारवासनासद्भावदर्शनाच्च किंच विदेहमुक्तिसमये जीवन्मुक्तस्य वीतहव्यस्य वचनं रागनीरागतां गच्छ
द्वेष निःशेषतां व्रज भवद्भ्यां सुचिरं कालमिह प्रक्रीडितं मयेति अतो ज्ञानदार्ढ्याय निःशेषवासनाक्षयम
नसो निवृत्त्यर्थं च [illegible] वेदान्तमहावाक्यश्रवणमनननिदिध्यासनाभ्यासं च अष्टांगयोगसहासनाभ्या
सं च बोधदार्ढ्यपर्यन्तं पुनः पुनः कुर्यादित्यर्थः इदानीं ब्रह्मापरोक्षज्ञानदार्ढ्यायोपायांतरमाह श्रुत्या

वी०भ०ः
२०
20

चार्यप्रसादेन दृढो बोधो यदा भवेत् निरस्ताशेषसंसारनिदानः पुरुषस्तदा ॥ श्रुत्वा गुरूपदिष्टमहावाक्यश्र
वणादिना आचार्यप्रसादेन प्रणिपातादिना संपादितेनाचार्यप्रसादेन यदा बोधो दृढो भवेत् तावत्कालपर्यं
तं गुरूक्तमहावाक्यश्रवणादिकं गुरुप्रसादश्च संपादयेदित्यर्थः ते चातितरंत्येव मृत्युं श्रुतिपरायणा इति भगव
द्गीतायां वेदांतशास्त्रश्रवणसमर्थेनापि गुरुवाक्यश्रवणादि नैयमस्यातिक्रमणं श्रवणादयमर्थोवग
म्यते तर्हि वेदांतशास्त्रश्रवणाभ्यासाद्वा गुरूपदिष्टमहावाक्यश्रवणाभ्यासाद्वा अपरोक्षज्ञानदार्ढ्ये सति
तदा पुरुषः कथंभूतः स्यादित्याकांक्षायामतिदृढकंटकन्यायेन दृढापरोक्षज्ञानस्य संसारवासनया सह
निःशेषितमज्ञानतत्कार्यनिवर्तकत्वसमर्थे सति तदा पुरुषो निरस्ताखिलोपाधिर्भवतीत्याह निरस्ता
शेषसंसारनिदानः इति कर्मणोऽपि संसारकारणत्वात् किं निदानशब्देनोच्यते तथा सत्यज्ञाननिरासमंत
रेण कथं तत्कार्यस्य कर्मणो निरासः स्यादिति न शंकनीयं निदानशब्देनादिकारणमविद्योच्यते त
संसारनिदानं स्याः संसारादिकारणत्वं संसारकारणकर्मणः कारणत्वमात्रमिति मंतव्यं संसारस्य निदानं संसारनिदा
नं अशेषं च तत्संसारस्य निदानं च तथा निरस्तमशेषसंसारनिदानं सपरिकरमज्ञानं येन स तथोक्तः स्वरू
पज्ञानदार्ढ्ये सति सर्वोपाधिविनिर्मुक्तो भवतीत्यर्थः ॥ इदानीं निरस्ताशेषाज्ञानत्वे सति किं स्यादित्याकां
क्षायां तस्य विदेहमुक्तिमाह विशीर्णकार्यकरणो भूतस्य देहस्य नाशतः विमुक्तकर्मनिगडः सद्य एव विमुच्यते
॥ टीका ॥ विशीर्णकार्यकरणः कार्यं शरीरं करणानीन्द्रियाणि तानि विशीर्णानि शिथिलीकृतानि यस्य स वि
शीर्णकार्यकरणः ननु देहेंद्रियादौ विद्यमाने तस्य विशीर्णत्वं कथमिति चेत् स्वस्यापरिच्छिन्नब्रह्मा
कारभावनया देहेंद्रियादिपरिच्छिन्नत्वाभिमानाभावात् मुक्तस्य विशीर्णत्वं अत एवंभूतस्य देहस्य ना २०

द्रतः शब्दादिभिरनाक्रांतः इंद्रियादेर्विषयलौल्यत्वाद्विषयसन्निधाववश्यं विकृतचित्त इत्यर्थः अतएव विमुक्तकर्मनिगड इ
ति विशेषणं विमुक्तः संचितप्रारब्धागामिकर्मरूपनिगडं बंधनं यस्य स तथोक्तः अतः सद्य एव विमुच्यते तदैव निरस्ता
शेषसंसारनिदानत्वसमय एव विमुक्तो भवतीत्यर्थः कथं देहे स्थिते विदेहमुक्तिः स्यादिति नाशंकनीयं लोकदृष्ट्या
देहसत्त्वेपि निरस्ताशेषाज्ञानस्य तस्याज्ञानपरिकल्पितदेहस्याभावाद्विमुक्त एव तदैव भवति। अत्र श्रुतिः अशरीरं
वावसंतं न प्रियाप्रिये स्पृशत इति ननु चैवं सति प्रवर्तकाभावात्तच्छरीरं कथं प्रवर्तत इति चेत् यथैकापि चिंतायुक्त
स्य हस्तादिकं स्वतः स्वकार्येषु प्रवर्तते यथा तथा वासनाहीनमपि चक्षुरादि इंद्रियं स्वतः स्वार्थे प्रवर्तत एव यथि
गलतृणादौ यथा चक्षुरादिनीराजं पतति तद्वन्मुक्तदेहोपि भोजनादौ पूर्ववत्प्रवर्तते यथाध्वगो यदृच्छया प्राप्त
तीरनदीपिपनादिकमवलोकते तद्वन्मुक्तदेहोपि भोजनादिकमनुभवति अतः पूर्वसंस्कारवशात् कुलाल
चक्रन्यायेन प्रारब्धजडभरतादिदेहवत् स्वतएव प्रवर्तत इति वेदितव्यं तस्य लोकदृष्ट्यैव शरीरपतनं तस
मेपश्रुतिः तद्यथाहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेते अथायमशरीरोऽमृतो प्राणो
ब्रह्मैव तेज एवेति एवं ब्रह्मापरोक्ष्य दोषो निरस्ताशेषाज्ञानस्य पुरुषस्य वासनालेशेन सह अज्ञानतत्कार्य
कर्म सर्वक्षये विदेहमुक्तिरुक्ता एवं भूतस्यापि लोकदृष्ट्या देहावस्थानमात्रेण जीवन्मुक्तत्वांगीकारे ब्रह्मादी
नामप्यन्यदेहसंभवाज्जीवन्मुक्तत्वमेव स्यात् तेषां नित्यं तथामपरिच्छिन्न ब्रह्मत्वेन प्रसिद्धत्वात् ५१ एवं वि
देहमुक्तिनिष्ठामुक्ता इदानीं ब्रह्मापरोक्ष्य ज्ञानमात्रात् पुरुषस्य निरस्ताशेषाज्ञानत्वासंभवात् संचितकर्मबं
धस्यैव संक्षये जीवन्मुक्तिमाह प्रारब्धकर्मवेगेन जीवन्मुक्तो यदा भवेत् किंचित्कालमनारब्धकर्मबंधस्य संक्षये
५२ टीका पुरुषो यदा अनारब्धकर्मबंधस्य संक्षये जीवन्मुक्तो भवेत् तदा प्रभृति प्रारब्धवेगेन सह प्रारब्धके

बा. टी. विफलहेतुभूतरागादिसंसारवासनालेशेन सहकं चित्कालमवतिष्ठत इत्यन्वयः एतदुर्लभं भवति ब्रह्मलोपरो ब्रह्मज्ञाना
२१ दनारब्धकर्मबंधस्य संचितकर्मणः क्षये सति जीवन्मुक्तस्य तु पुनः शमादिसाधनानुष्ठानेन सह वेदांतश्रवणमनन
निदिध्यासनाभ्यासस्य यत्नः पुष्कलेन कृतत्वात् बोधदार्ढ्ये सति निरस्तातिशयाज्ञान[..]त्वात् प्रारब्धकर्मवासनालेशा
91 नुवृत्तेरपि लये देहाद्यभिमानाभावात् स विदेहमुक्तो भवति यस्य तु अपरोक्षज्ञानमात्रमेव स्यात् तस्यापरोक्षज्ञा
नमात्रादनारब्धस्य संक्षये सति बोधदार्ढ्यहेतुभूतश्रवणाद्यभ्यासाकरणात् बोधदार्ढ्याभावे प्रारब्धकर्मवास
नालेशानुवृत्त्या सहकं चित्कालं स तु जीवन्मुक्त एवावतिष्ठते तस्यापि कालांतरे शमाद्यनुष्ठानेन सह श्रव
णाद्यभ्यासकरणेन ज्ञानदार्ढ्यं संभवति चेत् प्रारब्धकर्मवासनाविच्छित्तिद्वारा देहाद्यभिमानाभावात् विदेहमु
क्तिः संभवति यदि ज्ञानदार्ढ्यं न स्यात् तर्हि प्रारब्धकर्मवासनाभासनिवृत्त्यभावात् देहपातपर्यंतं जीवन्मुक्तरू
प एवावतिष्ठत इति प्रारब्धं नाम इदानीं प्रतीयमानदेहस्य स्थितिनाशहेतुभूतं कर्म अनारब्धं भविष्यद्देहोत
त्पादकं संचितकर्म ज्ञानोत्पत्त्यनंतरं देहाद्यध्यासमये कर्तृत्वभोक्तृत्वाद्यभिमानमंतरेण क्रियमाणमागामि
कर्म । तत्र प्रारब्धं त्रिविधं ऐहिकमनैहिकं परैहिकं चेति तत्र नैहिकपरैहिकरूपः स्वकीयप्रयत्नो नास्ति ऐहि
केन तु यत्नं कृत्वा स्वाभीष्टस्यान्नपुत्रादेः किं च आकाशगमनादिसिद्धिजालानि वांछति चेत् तन्नापि क्रमात्साधयति य
स्तु यो बालिशो सोपि सिद्धिजालानि वांछति स सिद्धसाधनैर्दुर्लभैस्तानि साधयति क्रमादिति वासिष्ठवचनात् पर
रदानीं संसारवासनालेशानुवृत्तिवशात् कर्तृत्वभोक्तृत्वाद्यभिमानमंतरेण प्रारब्धकर्मफलानुभवसमये क्रि
यमाणमागामिकर्म न बंधहेतुरिति शंकामपनयन् प्रारब्धकर्मान्ते विदेहमुक्तिमाह निरस्तातिशयानंदं वैष्णवं पर
मं पदं पुनरावृत्तिरहितं कैवल्यं प्रतिपद्यते पर टीका येन वैष्णवं परमं पदं प्रतिपद्यत इत्यन्वयः विमुक्तव्याख्या विलयमात्रा २१

तो विभुशब्द उत्पन्न [illegible] विशेषस्त्विति वैलक्षण्यमतः सर्वदेशकालवस्तुव्यापकत्वादेव परमं उत्कर्षं पद्यत इति प
रस्वरूपमित्यर्थः वैलक्षण्यमित्यनेनांगांगिभावो नांगीकृतः शिलायाः पुत्तलिका राहोः शिर इतिवद्भेदोपचारः वैलक्ष
ण्यत्वं वैलक्षण्यं पदं सर्वव्याप्तस्वरूपं प्रतिपद्यते प्राप्नुवन्भवति कर्मक्षयेण व्यक्तिनित्यप्राप्तस्य स्वरूपस्याविद्यया प्रच्छा
दितस्य विद्यया प्राप्तिरित्यर्थः तस्मात्परमपुरुषार्थसाधनत्वं तत्स्वरूपमेवाह निरस्तातिशयानंदमिति एतस्य
रूपं व्याख्यातं निरस्ता मानुष्याद्युत्तरोत्तरशतगुणातिशयानंदा यस्मिन् तत्तथा अपरिमितआनंद इत्यर्थः लोक
संयोगानां वियोगांतत्वदर्शनात्तस्माद्धीनो कालांतरे तद्वियोगेन पुनरावृत्तिशंकायामनावृत्तिः शब्दादित्यधिक
रणन्यायेन पुनर्जीवत्वप्राप्तिं वारयति पुनरावृत्तिरहितमिति अनादेरस्य प्राप्तावेव वियोगः अत्र तु तत्स्व
तदेवानुप्रविशदहमात्मा गुडाकेश सर्वभूताशयस्थितः व्यष्ट्या स्वाद्व्यानंदपूर्णः पूर्वस्वमायया स्वयमेव जग
त्कृत्वा प्रविश्य जीवरूपतः तत्त्वमस्यादिवचनात् जीवपरयोर्वस्तुतोऽभेदात् भाक्तिः प्रयोगेनास्तीत्यर्थः तथापि त
त्पकृत्वानन्निवर्त्तत इति ननु तर्हि घटाकाशवत्सर्वगतेन परमेश्वरेण तद्भिन्नस्य जीवस्य तत्प्राप्तिरयुक्ता घटाकाशस्य सा
र्वाप्राप्त्यभाववत् उपाधिनिवृत्त्या तद्भावापत्तिरेव प्राप्तिरित्याह कैवल्यमिति उपाधिविनिर्मुक्तघटाकाशवत्सर्वो
पाधिविनिर्मुक्तो स्वयमखंडसच्चिदानंदस्वरूपेणावतिष्ठत इत्यर्थः अयमाशयः अपरोक्षज्ञानेनाज्ञान
निवृत्तिद्वारा संचितकर्मनाशे सति रागादिसंसारवासनालेशानुवृत्त्या कर्तृत्वभोक्तृत्वाद्यभिमानमंतरेण प्रा
रब्धकर्मफलानुभवसमये आभासरूपेण क्रियमाणेनागामिकर्मणा सह जीवन्मुक्तस्य तद्वियोगम उ
त्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशादित्यधिकरणन्यायेन कर्तृत्वाद्यभिमानाभावाद्वस्तुगत्या मनःक
र्तृत्वाभावाच्च तद्यथा पुष्करपलाशे आपो न श्लिष्यंत एवमेवंविदि पापं कर्म न श्लिष्यत इत्यादिश्रुत्या

वृ॰ व॰ चतुं श्लेषो न स्यात् प्रारब्ध कर्म वेग स्यापि मुक्तेषु इव वेन तया निवृत्तिः अतः संचित कर्मणो बोधेन नष्टत्वात् आगामि
२२ कर्मणः संबंधाभावात् प्रारब्ध कर्मणो भोगेन नष्टत्वात् कारणाभावात् कार्याभाव इति न्यायेन देहांतरस्य प्राप्त्यभावा
22 त् प्रारब्ध कर्मभोगांते न तस्य प्राणा उत्क्रामंत्यत्रैव समवलीयंत इत्यादि श्रुत्या तत्र श्रमस्य जलवत् मुक्त देह प्राणानां
विलयः स्यात् अत्र प्राणशब्देन ज्ञानेंद्रिय पंचकं कर्मेंद्रिय पंचकं प्राणादि पंचकं अंतःकरण चतुष्टयं लिंगशरीरा
त्मकं सर्वमुच्यते प्राणादि रूपत्वाभावात् देहांतर संभवो न स्यात् अत्र देहे प्राणस्य लीनत्वात् जीवन्मुक्तस्य शरीरत्वमपि न
स्यात् तदानीं मुक्तस्य शरीरं मृतं भवतु सद्यः पतति तदा उपाधि विनिर्मुक्त घटाकाशवत् परिपूर्णो चिदानंद
स्वरूपाकाशो भवतीति अत्र श्रुतयः तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इति भिद्यते हृदय ग्रंथिः ज्ञाना
ग्निः सर्वकर्माणि ज्ञानं लब्ध्वा परां शांतिं तत्र को मोहः कः शोकः ब्रह्मवेद ब्रह्मैव भवति तरति शोकमात्मवित्
ब्रह्मविदाप्नोति इत्यादि श्रुति स्मृति पुराणन्याय मर्यादि विधीयते ५३ इति श्री मन्महायोगी माधव प्राज्ञ गुरु प्रसा
दादिनावधि मितज्ञानानंद स्वरूप विश्वेश्वर पंडित विरचिता वाक्यवृत्ति प्रकाशिका समाप्ता लिखितं गुमानीरा
मेणामृतसरसि ॥ शुभं भूयात् श्रीशंकराय नमः रामकृष्णाभ्यां नतिरस्तु ॥

वेदांत

२२